अथ हविषां व्यापन्निमित्तकानि[६] व्याख्यास्यामः। यथा सलोहिताः कीटाः परिख्याता अन्यत्र मक्षिकाभ्यो नीलमक्षिका शातिका[७] मत्कुणश्चेलशिरसोर्यूके कीटो वा पिण्डकारी स्यात् , क्षुद्रकीटमक्षिकापिपीलिका[८]वर्जꣳ, श्वमार्जारनकुलमर्कटध्वांक्षग्रामाखुपुरीषसिक्पदकेशमृतनख[९]कुनखद्रप्सस्वेदाश्रुस्नेहासृक्कास्क्षवथ्वार्द्रव्रणैर्वोपहतमन्यैर्वोपहतꣳ रजस्वलया स्पृष्टꣳ तथा चाप्रयतेन भ्रूणघ्नेन वा दृष्टं तथापपात्रेणामेध्ये[१०] वा देशे॥ १॥ स्कन्नं दुष्टं व्यापन्नꣳ हविरपोऽभ्यवहरेयुः॥ २॥ [११]शीतभस्मनि वा निधाय मिन्दाहुती हुत्वाऽथान्यं निर्वपेदाज्येन वा प्रचरेत्॥ ३॥ [१२]अप्यु हैके[१२] क्षिप्रसꣳस्कारमाज्यं [१३][ब्रुव]ते॥ ४॥ [४]

[इति चतुर्थोऽनुवाकः]

अथ हविषाꣳ सꣳस्कारकाल औषधेष्वातण्डुलानां प्रक्षालनाद् व्रीहिवत्प्रवृत्तिः। आविष्टभावादित्येके। अन्नवदत ऊर्ध्वम्। [१४]यद्यप्रत्तदैवतꣳ [१५]हविर्व्यापद्येतान्यद्धविस्तद्दैवतं[१६] निर्वपेत्। तत्र स्रुगादानप्रभृतयो मन्त्रा आवर्तेरन् यावदाव्यापद्येत। यदि प्रत्तदैवतमाज्येन शेषꣳ सꣳस्थापयति। [१७]........ द्यताज्येन तां देवतां यजेत्। [१८]सꣳस्थाप्य तेनैव[१८] पुनर्यजेत। अन्यत्राप्रयोजकेभ्यो[१९] यथा

१. MHP °खारे. २. MHP अग्नयेदग्नये°. ३. MHP मेषिकाक्षीरं thrice. ४. M भावम्. ५. MH °मुन्त्रां, P °मुन्तां. ६. MHP °न्निमत्त°. ७. HP शात्तिका, ८. MHP पिपीलक°. ९. M °सिक्वदकेशमृतनवकु°. १०. तथापयपा° ११. MHP गीतभस्मनि. १२-१२. MHP °व्यूहेके. १३. MHP broken. १४. P यद्यपत्त°; H यद्यत्प्रत्त°, thus M. १५. MHP हविष्याप°. १६. MHP °द्देवतां. १७. MHP broken. १८-१८. MHP सꣳस्थाप्यते नैव. १९. MHP °अन्यात्राप्र°.

फलीकरणहोमो वाजिनचर्येति॥ १॥ अथ यस्य सर्वाणि हवीꣳषि नश्येयुर्दुष्येयुः क्षायेयुरप[१] एनमभ्यवहृत्याज्येन[२] तामिष्टिꣳ सꣳस्थाप्याथान्यामिष्टि[मनुल्बणां तन्वीत; यज्ञो हि यज्ञस्य प्रायश्चित्तिरिति][३] स्मरेत्। तदवस्थायानुवर्त[यति][४] तस्मात्तद.......[५] तदस्मात्स्विष्टकृत इत्येक आहुरनूयाजेभ्य इति। अत आ समिष्टयजुर्भ्य इत्येके। सर्वत्र पुनरभ्यावृत्तिरित्यपरम्॥ २॥ अहर्विपर्यासे प्राक् स्विष्टकृतः स्मरेद् यथाक्रमं प्रदीयेत। अथैक आहुः कर्मव्यत्यासो [हैष यत्र][६] स्त्रीपुꣳसावन्योऽन्यस्याङ्गानि व्यतिषज्य नन्दत, एवं यज्ञः प्रमादकृतेन व्यत्यासेन नन्दतीति विज्ञायते[७]॥ ३॥ अथ यत्र होता वाऽध्वर्युर्वा देवते वाऽवदाने[८] वा याज्यापुरोनुवाक्ये वा विपर्येयातां यदत्र[९] चित्रं पुष्कलं गृहे स्यात् तद् दद्यात्॥ ४॥ अथाधिदेवता....[१०] तामूह्य तामनूपलक्षयेत्[१०क]। प्राक् स्विष्टकृतो यजेत्॥ ५॥ अथाविहितप्रायश्चित्तिर्यासु सन्ततिः सव्याहृतिका **'यन्म आत्मनो मिन्दाऽभूत्', 'पुनरग्निश्चक्षुरदाद्', 'इमं मे वरुण', 'तत्त्वा यामि', 'त्वं नो अग्ने', 'स त्वं नो अग्ने', 'त्वमग्ने अयासि'** इति जुहुयात्। एषा सर्वप्रायश्चित्तिरित्युक्ता प्रायश्चित्तिषु विध्यवशेषाः॥ ६॥ [५] [इति पञ्चमोऽनुवाकः]

अथातो निगदसिद्धानि प्रायश्चित्तानि व्याख्यास्यामः॥ १॥ सर्वत्रोपरिष्टान्मन्त्रकृतम्॥ २॥ यद्यधस्तान्निपतेत् **'ब्रह्म प्रतिष्ठा मनसः'** इत्येतया स्रुवाहुतिꣳ हुत्वैतयैव प्रतिष्ठापयेत्॥ ३॥ प्रतिष्ठाप्य वा जुहुयात्॥ ४॥ हुत्वाऽनन्तरं कर्म कुर्याद्, एवं कर्म॥ ५॥ एतदतिक्रान्तं कर्म नाद्रियेत यद्यर्थलुप्तꣳ[११] स्यात्॥ ६॥ सर्वत्राश्रावितप्रत्याश्रावितवषट्काराणामत्युक्तानुक्तदुरुक्तहीनेषु[१२] **'आश्रावितमत्याश्रावितम्'** इत्येतया स्रुवाहुतिं जुहुयात्॥ ७॥ सर्वत्र देवतोच्चारणेषु भागिनीं देवतामनुच्चारयित्वा योऽन्यामुच्चारयेदत् **'यद्वो देवा अतिपादयानि'** इत्येतया स्रुवाहुतिं जुहुयात्॥ ८॥ सर्वत्र देवताऽऽवाहनेषु भागिनीं देवतामनावाहयित्वा योऽन्यामावाहयेदेतयैव[१३] स्रुवाहुतिं जुहुयात्॥ ९॥ यत्र स्मरेत्तदुपोत्थाय मनसाऽऽवाहयेदथातिरिक्तमाज्येन यथोढां यजेत्॥ १०॥ यदि प्रणीताः[१४] प्रणीयमानाः प्रणीतापः स्कन्देयुर्वोपदस्येयुर्वा **'आपो हि ष्ठा मयोभुवः'** इति तिसृभिर्गृहीत्वा [१५]**'ततं म[१५] आपस्तदु[१६] तायते[१६] पुनः'** इत्येतया स्रुवाहुतिं जुहुयात्॥ ११॥ सर्वत्र वितते यज्ञे यदि सूर्यो नाविर्भवति **'उद्वयं तमसस्परि', 'उदु**

१. H क्षाययेयुः°. २. MHP एनभ्यव°. ३. MHP broken; cf.ĀpŚS IX.15.15. ४. MHP broken; see ĀpŚS IX.15.14. ५. MHP broken. ६. MHP broken. ७. MHP विज्ञायेते. ८. MHP °पदाने. ९. M यदत्व. १०. MHP broken. १०क. MHP तामूह्यमषूपवक्षयेत्. ११. MHP °यूपꣳ. १२. MHP °मत्युत्तानुत्तदुरुत्तरही°. १३. MHP देतामेव. १४. MHP प्रणीतां. १५-१५. MP कतमु. १६-१६. MP °तदुन्नायते, H तदुतायवे



**त्यं', 'चित्रम्'** इत्येताभिस्तिसृभिः स्रुवाहुतीर्जुहुयात्॥ १२॥ सर्वत्र वितते यज्ञे यदि[१] सूर्याचन्द्रमसोर्ग्रहणं भवत्येतदेव[२]॥ १३॥ अथ यदि यजमानस्यर्त्विजां वा स्वप्ने रेतःस्कन्नं भवति **'इमं मे वरुण', 'तत्त्वा यामि'** इत्येताभ्यां स्रुवाहुती[३] जुहुयात्॥ १४॥ सर्वत्र हविर्देवतायाज्यापुरोनुवाक्याहुतीनाꣳ हुताहुतभ्रेषेष्वन्तरिते विपर्यासे च **'त्वं नो अग्ने', 'स त्वं नो अग्ने'** इत्येताभ्याꣳ स्रुवाहुती[३] जुहुयात्, ततोऽन्यदाहारयेत्॥ १५॥ सर्वत्र वितते यज्ञे यदि[१] पुरा प्रयाजेभ्यो बहिः परिध्यङ्गारा अभिपर्यावर्तेरन्, ब्राह्मणोक्तं प्रायश्चित्तं कृत्वा **'इमं जीवेभ्यः परिधिं दधामि'** इत्येतया स्रुवाहुतिं जुहुयात्॥ १६॥ सर्वत्र वितते यज्ञे यदि यज्ञभ्रेष आगच्छेत् **'इष्टेभ्यः स्वाहा'**॥ १७॥ [६]

**'इष्टेभ्यः स्वाहा', 'समृध्यै स्वाहा'** इत्येतैः स्रुवाहुतीर्जुहुयात्॥ १॥ सर्वत्र वितते यज्ञे यदि जन्यं भयमागच्छेत् **'यत इन्द्र भयामहे', 'स्वस्तिदा विशस्पतिः'** इत्येताभ्याꣳ स्रुवाहुती[४] हुत्वाऽभये पुनर्यजेत॥ २॥ सर्वत्रोपाꣳश्वादिवाचः स्थानानाꣳ स्वराक्षरपदवृत्तभ्रेषेषु **'आभिर्गीर्भिर्यदतो न ऊनम्'** इत्येतया स्रुवाहुतिं जुहुयात्॥ ३॥ सर्वत्रानाज्ञातप्रायश्चित्तेषु **'अनाज्ञातं', 'पुरुषसंमितः'** इत्येताभ्याꣳ स्रुवाहुती[३] जुहुयात्॥ ४॥ सर्वत्र [५]प्रयाजानूयाजेध्माबर्हिषः [६]पाकत्राकर्मसु '[७]**यत् पाकत्रा[८] मनसा'** इत्येतया स्रुवाहुतिं जुहुयात्॥ ५॥ सर्वत्र स्कन्ने भिन्न ऊनातिरिक्तेषु मिन्दाहुती[३] जुहुयात्; अथ व्याहृतीभिश्च जुहुयात्॥ ६॥ सर्वत्राग्न्युपघातेषु **'पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धताम्'** इत्येतया समिधमादध्यात्॥ ७॥ सर्वेषु यज्ञक्रतुषु पत्नीः[८] संयाज्याथ प्राडेत्यात्राप्याय्य ध्रुवाꣳ स्रुवेणोपघातध्रुवाया[९] अधि [१०]सर्वप्रायश्चित्तानि जुहोति **'ब्रह्म प्रतिष्ठा मनसः'** इत्यान्तमित्येतेनानुवाकेन[११]॥ ८॥ अथाप्याम्नायो भवति 'समिष्टयजूꣳषि जुहोति [१२] (यज्ञस्य समिष्ट्यै, यद्वै यज्ञस्य क्रूरं यद्विलिष्टं यदत्येति यन्नात्येति यदतिकरोति यन्नापि करोति तदेव तैः) प्रीणाति' इति ब्राह्मणम्[१३]॥ ९॥ एतान्येव ब्राह्मणविहितानि [१४]प्रायश्चित्तान्याप्यायनानि [१५]निगदवन्ति भवन्ति॥ १०॥ [१५]निगदवन्ति नैमित्तिकानीत्येके॥ ११॥ [७] [इति षष्ठोऽनुवाकः]

१. MHP इति. २. MHP इत्येत°. ३. MHP हुतिं. ४. MHP °हुतीर्. ५. MHP om प्र. ६. MHP °कत्रकर्म° ७-७. M यत्वा कत्रा. ८. MHP च नीः. ९. MHP °स्रुवाया. १०. MHP सर्वत्र. ११. MHP °त्येतान्यनु°. १२. MHP abr. cf TS VI. 6.2.1. १३. MHP ब्रह्मणम्. १४. MHP °त्तानि नाप्यायनानि. १५. MHP नियमवन्ति.

अथ हविषां प्रमादकृते प्रायश्चित्तानि व्याख्यास्यामः। कपालानामनभिप्रथने **'भूर्भुवः सुवः'** इत्याहवनीये स्रुवाहुतीर्जुहुयात्; एतदेव नानाप्रथने चातिप्रथने च॥ १॥ अथ [1]हविषामशृतोत्सेकविस्रावद्रवदाहेषु प्रायश्चित्तिः। अशृते **'रुद्राय स्वाहा'** इति स्रुवाहुतिं जुहुयात्[2]; अथोत्सेकविस्रावे यस्यां दिश्युत्सिच्येत तस्यै देवतायै स्रुवाहुतिं जुहुयात्; अथ यदि प्राच्यां दिशि **'अग्नये स्वाहा'** इति; अथ यदि दक्षिणायां **'यमाय स्वाहा'** इति; अथ यदि प्रतीच्यां **'वरुणाय स्वाहा'** इति; अथ यद्युदीच्यां **'सोमाय स्वाहा'** इति; अथ यदि सर्वासु [3]दिक्षूत्सिच्येतैतैरेताभ्यः सर्वाभ्यो अग्नये यमाय वरुणाय सोमायेति स्रुवाहुतीर्हुत्वा [4]तमाज्येनाप्याययति **'आप्यायस्व', 'सं ते पयाꣳसि'** इत्येताभ्याम्; अथ यदि द्रवेत् **'वायवे स्वाहा'** इति; अथ यदि विदहेत् **'निर्ऋत्यै स्वाहा'** इति; यदि विदग्धꣳ स्याद्यत्तत्र शृतꣳ स्यात्तेन प्रचरेत्; अथ यदि सर्वमेव विदग्धꣳ स्यादपोऽभ्यवहृत्याज्येन[5] तामिष्टिꣳ सꣳस्थाप्याथान्यं[6] निर्वपेत्; आज्येन वा प्रचरेत्; सैव ततः प्रायश्चित्तिः॥ २॥ अथ हविषामुद्वासनकाले पतनसꣳशरणोद्वर्तनखण्डनसꣳसर्पणविपरीतव्यवायकरणेषु **'भूर्भुवः सुवः'** इत्याहवनीये स्रुवाहुतीर्जुहुयात्; अथान्तरेण वेद्युत्करावुदङ्ङुप[7]-निष्क्रम्या तमितोरुदङ् सꣳसृप्य व्याहृतीरुक्त्वा व्याहृतीभिः प्रतिपद्येत॥ ३॥ विज्ञायते— सर्वेषामेव देवानां रसो यद् व्याहृतयः, सर्वेषामेतद्वेदानाꣳ रूपं यद् व्याहृतयः, सर्वेषामेतद्वेदानां मूलं यद् व्याहृतयः; **'भूः'** इति वा ऋचाꣳ रूपं, **'भुवः'** इति यजुषाꣳ, **'सुवः'** इति[8] साम्नामिति; तस्मान्नु ह सर्वैरेव वेदैर्यज्ञस्य विलिष्टꣳ सन्दधाति, सꣳस्करोति; न ह वै तत्र काचनार्तिर्भवति न रिष्टिर्यत्रैता व्याहृतयः प्रयुज्यन्ते; तस्मान्नु ह व्याहृतीरेव प्रयुञ्जीरन्॥ ४॥ **मन्त्रोनं वा**॥ ५॥ [८]

**'मन्त्रोनं वा दुरिष्टं वातिरिक्तं वापि यत्कृतम्।**
**व्यपोहन्तीह पाप्मानं तस्माद्[9] व्याहृतयः[10] स्मृताः'** इति॥ १॥

**उद्वृत्ते तु पुरोडाशे स्पन्दिते वेपिते तथा[11]।**
**भिन्ने सꣳसर्पणे चापि प्रायश्चित्तं कथं विदुः**॥ २॥

विज्ञायते-

१. MHP °मशित्रोत्सेक°. २. MHP add अथोत्सेकविस्रावदहदाहेषु प्रायश्चित्तिरशृते रुद्राय स्वाहेति स्रुवाहुतिं जुहुयात् after जुहुयात्. ३. MHP दिक्षु ऋत्विच्येतै°, [ H °क्ष्वृत्वि°.] ४. H तमाज्याना°. ५. MHP स्यादप एनभ्यव°; corrected in H as स्यादपरानभ्य°. ६. HP सꣳस्थाप्याज्यं, thus M. ७. MHP वेद्युन्करावुदङ्च. ८. MHP om इति. ९. H adds यद् after तस्माद्. १०. M °हृतयै H °हृतये, P °हृतेये. ११. M च वा.



**उद्वृत्ते तु कुलꣳ हन्यान्नश्यत्युद्वेपिते प्रजाः।**
**सꣳसर्पिते विभिन्ने वा यजमानः प्रमीयते**॥ ३॥ इति॥

अथ पतनसꣳशरणोद्वर्तनखण्डन[1]सꣳसर्पणेषु प्रसिद्धमुद्वास्य बर्हिषदं कृत्वा प्रभ्वाज्येनोपसिच्याभिमन्त्रयते **'किमुत्पतसि किमुत्प्रोष्ठाः शान्तः शान्तेरिहाऽऽगहि। अघोरो यज्ञियो भूत्वाऽऽसीद सदनꣳ स्वम्; 'मा हिꣳसीर्देवप्रेषित[2] आज्येन तेजसाऽभ्यङ्क्ष्व मा नः कश्चन रीरिषः। योगक्षेमस्य[3] तु शान्त्या[3] अस्मिन्नासीद बर्हिषि'** इत्येताभ्याम्॥ ४॥ ब्रह्मणे वरं दत्त्वाऽन्तर्वेद्यासाद्य[4] प्रचरेत्; तस्याꣳ सꣳस्थितायां तदानीमेव सुरभिमर्ती[5] निर्वपेत्; तस्याꣳ सꣳस्थितायां तन्तुमर्ती निर्वपेत्; न ह वै तत्र काचनार्तिर्भवति न रिष्टिर्यत्रैषा प्रायश्चित्तिः क्रियते॥ ५॥ यथा यदु ह वै किञ्च आमयावी भवति तदा तस्य भैषज्यं कुर्यात्तदनामयावी भवति तादृक् तस्य व्यापन्नस्य प्रायश्चित्तिरिति॥ ६॥

**स्कन्ने [6]ग्रहणनिर्वापे द्रव्याणां चानुमन्त्रणे।**
**[6क]यस्मिन्काले [6ख]विजानीयात्तत्कुर्याद्येन सꣳस्थिते**॥ ७॥

**प्रणवो व्याहृतयश्च[7] यज्ञ एष परोऽवरः।**
**तस्माद्यज्ञस्य यत्स्कन्नं विपरीतं च यद्भवेत्।**
**सर्वं व्याहृतीभिः कुर्यादन्यत्र[8] च वषट्कृतात्**॥ ८॥

**अजानद्भिः कृतं यच्च[9] त्वरमाणैश्च यत्कृतम्[10]।**
**व्याहृतीनां प्रयोगेण तत्सर्वं कृतमेव तत्**॥ ९॥

**कपालानां प्रमाणानि ब्रूयादाध्वर्यवे विधौ।**
**समानि चतुरस्राणि द्व्यङ्गुलानि समन्ततः।**
**हविर्वृत्तवशात्तानि समानि विषमाणि च**॥ १०॥ [९] [इति सप्तमोऽनुवाकः]

अथ यद्यरणी जीर्णे स्यातां मन्थनेन वा जन्तुभिर्वाऽन्येन वाऽथ समाने नवे अरणी आहृत्य श्वोभूते दार्शपौर्णमासिकेनेष्ट्वा तस्मिन् जीर्णे अरणी शकलीकृत्य गार्हपत्ये प्रक्षिप्य ज्वलयित्वाऽथ नवे आद[illegible] दक्षिणेनोत्तरारणिꣳ[11]

१. MHP खञ्जनं. २. MHP नीसीर्देव°. ३-३. MHP °क्षेमस्यर्तूशाला; cf ĀśvŚS III. 14.13; ĀpŚS IX. 16.11. ४. MH °सद्य. ५. MHP °मती. ६. MHP ग्रहणं. ६क. MHP तस्मिन्. ६ख. MHP विभजनीयात् कु°. ७. MH °चैव. ८. MHP कुर्याद्यन्यत्र. In P द्यं corrected as द in red-ink. ९. MHP add त्वच्च after यच्च which metricaly seems to be superfluous. १०. MHP कृते. ११. MHP °त्तराणि.

सव्येनाधरारणिम्॥ १॥ ते उपर्यग्नौ धारयन् जपति '**उद्बुध्यस्वाग्ने प्रविशस्व योनिमन्यां [देवयज्यां][१] वोढवे जातवेदः। अरण्या अरणिमनु संक्रमस्व जीर्णां[२] तनुमजीर्णया[२] निर्णुदस्व**' इति॥ २॥ '**अयं ते योनिर्ऋत्वियः**' [३]इत्यरण्योरग्निꣳ समारोह्य मन्थनस्यावृता विहारं कल्पयित्वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुवं च स्रुचश्च संमृज्य प्राडेत्याहवनीयस्यार्धं चतुर्गृहीतं गृह्णीते॥ ३॥ तज्जुहोति '**मनो ज्योति[४](र्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु। या इष्टा उषसो निम्रुचश्च ताः सं दधामि हविषा) घृतेन स्वाहा**' इति॥ ४॥ अथाग्नये तन्तुमते पुरोडाशमष्टाकपालं निर्वपेत्; तस्याः प्रसिध्यति कर्मा[५] दक्षिणाकालात्; दक्षिणाकाले शरावं दक्षिणां ददाति; सन्ततिमनुहोतुराहुतिं जुहोति; प्रसिध्यति कर्म; सन्तिष्ठत एषेष्टिः॥ ५॥ अथ यदकृत्वाऽऽग्रयणमाहिताग्निर्नवस्याश्नीयाददो वा एष, [६][देवा]नां वा एष आनीतो य आहिताग्निरदन्त्यस्य देवा अन्नम्; यदकृत्वाऽऽग्रयणं नवस्याश्नीयाद् देवेभ्यो भागं परिक्लृप्तमद्यादार्तिमार्च्छेत्॥ ६॥ वैश्वानरं द्वादशकपालं निर्वपेद्यस्य यमौ जायेयातां गावौ वा पुरुषौ वा; निर्वीर्यतां वै पुरुष आपद्यतेऽपशुतां[७] गौः; गायत्री पुरोनुवाक्या भवति, [८][त्रिष्टुग्याज्या॥ ७॥ आग्नावैष्णव]मेकादशकपालं निर्वपेद्यमन्यस्याग्निषु याजयेयुर्यस्य [९]वाग्निष्वन्यो यजेत॥ ८॥ रौद्रं वास्तुमयं चरुं निर्वपेद्यस्य रुद्रः पशूञ्छमयेत्[१०]॥ ९॥ एतयैवावृता निषादस्थपतिं[११] याजयेत्; सैव तस्येष्टिः॥ १०॥ [**१०**] [इत्यष्टमोऽनुवाकः]

अथातोऽग्नीनामेवोद्वातानां प्रायश्चित्तिः॥ १॥ स यदि [१२][गार्हपत्य उद्वायेत्तदुद्]धृत्यैतद् भस्मावोक्ष्य मन्थनस्य [१३][तान्येवावक्षाणानि संनिधाय] दशहोतारमरण्योर्व्याख्याय गार्हपत्यं[१४] मन्थेत् '**इतः प्रथमं जज्ञे[१५](अग्निः स्वाद्योनेरधि जातवेदाः। स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु) प्रजानन्**' इति; अथैनमभिमृशति '**इषे रय्यै रमस्व [१६](सहसे द्युम्नायोर्जेऽ)पत्याय**' इति; '**सारस्वतौ त्वोत्सौ[१७] समिन्धाताम्**' इति समिन्धे; '**सम्राडसि विराडसि**' इत्युप[समाधायान्वाहार्यपचनमाहृत्य ज्वलन्तमाह][१८]वनीय[मु][१९]द्धृत्य न्युप्योपसमा-

---

१. MHP om; cf BaudhŚS 27.7 : ५. २-२. MHP जीर्णान्तरमनुजी°. ३. MHP इत्यथार°. ४. MHP abr; cf TS I. 5.10.6. ५. MHP कर्म. ६. MHP broken; cf ĀpŚS IX. 14.6. ७. MHP पशूनां°. ८. MHP broken cf ĀpŚS IX. 14.9-10. ९. MHP om वा. १०. MHP पशूञ्जमयदेत°. ११. MHP पतिः. १२. MHP broken between यदि and धृत्यैतद्. १३. MHP broken between मन्थनस्य and दशहोता°; cf TS II. 2. 4. 14. १४. MHP °पत्यमस्वेद. १५. MHP abr; cf TS. II. 2.4.15. १६. MHP abr; cf TB I. 4.4.12. १७. MHP त्वोत्थौ. १८. MHP broken; cf BaudhŚS27.10 : 13-14. १९. MHP broken.



धाय गार्हपत्य आज्यं [१](विलाप्योत्पूय स्रुवं च स्रुचश्च संमृज्य प्राडेत्याहव)नीयस्यार्धं चतुर्गृहीतं गृह्णीते; तज्जुहोति दशहोतारं मनसानुद्रुत्य; अन्वारब्धे यजमाने प्रदक्षिणमावृत्य प्रत्यङ्ङुद्रुत्य गार्हपत्ये दशात्मकं जुहोति '**ब्राह्मण एक होता**' इत्येतेनानुवाकेन दश स्रुवाहुतीः; अन्वाहार्यपचन [२][उद्वायेद् गार्हपत्यादेनमुद्धृत्या-न्वाहार्यपचने चतु]र्होतारं जुहोति; गार्हपत्ये दशात्मकम्॥ २॥ [२क][अथ यदि] आहवनीय उद्वायेद् गार्हपत्योऽनुद्वातः स्यात्; गार्हपत्यादेनमुद्धृत्याहवनीये पञ्चहोतारं जुहोति; गार्हपत्य एव दशात्मकम्॥ ३॥ अथ सवनगतानामाग्नीध्रीय[३] उद्वायेद् गार्हपत्योऽनुद्वातः स्यात्; गार्हपत्यादेनमुद्धृत्याग्नीध्रीये षड्ढोतारं जुहोति; गार्हपत्य एव दशात्मकम्॥ ४॥ औत्तरवेदिक उद्वायेदाग्नीध्रीयो[४]ऽनुद्वातः स्यात् [४]आग्नीध्रीयादेनमुद्धृत्यौत्तरवेदिके सप्तहोतारं जुहोति; गार्हपत्य एव[५] दशात्मकम्॥ ५॥ एतयैवावृतैकैकस्मिन्नुद्वाते द्वयोर्वा प्रतिविभज्य होतॄन् जुहुयात्; व्याहृतीभिर्व्य-स्ताभिः समस्ताभिश्च जुहुयात्; तथा मिन्दाहुतीं[६] जुहुयात्; तथा मनस्वतीं जुहुयात् '**मनो ज्योतिर्जुषताम्**' इत्याहवनीये; सैषाऽजस्राणामन्वाहितानाꣳ सवनगतानाꣳ सर्वोद्वातानां प्रायश्चित्तिः॥ ६॥ अथ यदि यजमानो याजमानेषु मुह्येत प्रतते यज्ञेऽथान्तरेण वेद्युत्करौ व्याहृतीभिः प्रपदनं[७] व्याहृतीभिरेवानुमन्त्रणं व्याहृतीभिरेवो-पनिष्क्रमणम्। विज्ञायते-सर्वा वा ऋचः सर्वाणि यजूꣳषि सर्वाणि सामानि यद् [व्याहृतय इति][८], व्याहृतय एव प्रयोक्तव्याः; यत्र यत्र प्रसज्येत तत्र तत्र प्रयुञ्जीत॥ ७॥ [**११**] [इति नवमोऽनुवाकः]

अथातः सान्नाय्यस्य प्रायश्चित्तिः॥ १॥ यदि सान्नाय्यायापाकृता[८क] वत्सा धयेयुर्वायव्यया यवाग्वा सह यजेत॥ २॥ अप्येकस्यां दुग्धायां न धीतां दोहयेत्; दुग्धाभिः सꣳस्थाप्यादुग्धानां वत्सानपाकृत्य श्वः[९] सान्नाय्येन यजेत॥ ३॥ यदि सायंदोह [१०]आर्तिमार्च्छेदिन्द्राय व्रीहीन् निरुप्योपवसेदिति॥ ४॥ यथासमाम्नातꣳ[११] सायंदोहस्थाने कुर्याद्, अथवा प्रातर्दोहं द्वेधा कृत्वाऽन्यतरदातच्य सायंदोहस्थाने कुर्यात्॥ ५॥ अथ यदि प्रातर्दोह आर्तिमार्च्छेदैन्द्रं[१२] पुरोडाशं निरुप्य दध्ना सह प्रचरेत्; उभयं चेदैन्द्रं[१३] पञ्चशरावमोदनं निर्वपेत्; [१४]प्रसिद्धमाग्नेयेन चरति; ऐन्द्रेण शरावेणोभे देवते यजेत॥ ६॥ अथान्तर्वेद्यासादितानि कृष्णशकुनिः पक्षाभ्यामाधून्वानः [१५][पर्यभि]पतेदभिनिषीदेद्वा '**इदं विष्णुर्वि चक्रमे**' इत्याहवनीये स्रुवाहुतिं जुहुयात्; अथ यद्युच्चैः पतेन्नैतदाद्रियेत॥ ७॥

---

१. MHP abr; see **supra** 1.10. 3. २. MHP broken. २क. MHP om. ३. M °नामग्नीध्रीय. ४-४. MP °ग्नीध्रीयेऽनुद्वातस्याग्नी°. ५. MHP om. ६. MHP °हुतीञ्जुहु°. ७. MHP प्रदनं. ८. MHP om. ८क. MHP सान्नाय्ययोरपा°. ९. MHP श्च. १०. M आर्तिमार्तिच्छेदि°. ११. MH °सामा°. १२. MHP आर्तिमार्च्छेदेतेन्द्र [ M अर्ति°]. १३. MHP चेन्द्रं. १४. MHP प्रसिद्ध twice. १५. MHP om; see **infra** 1.16.13.

**मन्त्रहीनेऽतिरिक्ते वा दुरधीते दुरागते।**
**अनागतेऽवषट्कारे अतीते वापि यद्धुते ॥८॥**
**हविषः स्पन्दनादग्नेर्होतुर्हीन[१]स्वरेण च।**
**अतिदाघे च हविषां [२]यत्किञ्चित्पात्रभेदने ॥९॥**
**कपालनाशे भेदे वा चतुष्पद्यन्तरागते।**
**प्रणाशे तु पवित्रस्याज्यस्यैवाप्यवलोडने[३] ॥१०॥**
**हविषाञ्च विपर्यास ऋत्विक्ष्वप्रयतेषु[४] च।**
**यज्ञप्रसारणकाले द्वैधीभावे समुत्थिते ॥ ११ ॥**
**मिन्दाहुती च होतव्ये व्याहृत्यः प्रणवादिकाः।**
**वारुण्यस्तन्तुमत्यश्चाग्नेय्यश्च[५] मनस्वती ॥ १२ ॥**
**[६]महाव्याहृतयः सप्त प्राजापत्या तथैव च**
**[७][प्रसंधानाय यज्ञस्य त्वेते मन्त्राः प्रकीर्तिताः ॥ १३ ॥**
**अप्रायश्चित्तिको यज्ञो ह्यसुरैः संप्रभुज्यते।**
**असुरैर्भुक्तयज्ञस्तु देवान् दोषेण संश्रयेत् ॥ १४ ॥]**
**ऋत्विजो [८]यजमानं [च ह्यायुषो ब्रह्मवर्चसात्।][९]**
**[१०]प्रच्यावयेद्दुरिष्टं तत्[१०] तस्माद्दोषान् प्रणाशयेत् ॥ १५ ॥ [१२]**

[इति दशमोऽनुवाकः]

तमनीजानः संवत्सरः षण्मासो वा [११]नाभ्यतीयात्; यद्यतीयान्मांसं नाश्नीयात्; अथ कालातिनये अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्; वैश्वानरं द्वादशकपालमग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेत्; सर्वेषां दर्शपूर्णमासप्रभृतीनां [१२]कालातिनय एतामेव निर्वपेत् ॥ १ ॥ अथ सोमस्य कालातिनय एतां चैव सवनेष्टिं च निर्वपेदाग्नेयमष्टाकपालमैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपालमिति ॥ २ ॥ स यद्युच्छ्रीयमाणो यूपो वा चषालो वा प्रपतेत्[१३] **'ब्रह्म प्रतिष्ठा मनसः'** इत्येतया स्रुवाहुतिं हुत्वा **'ऊर्ध्व ऊ षु ण ऊतये'** इत्युच्छ्रयत्यभिमन्त्रयते वा ॥ ३ ॥ अथ यदि यूपः सुषिरः स्यादतीसारेण यजमानः

१. MHP °दीन°. २. MHP ये केचि°. ३. MHP °वापखोटने°. ४. MHP विक्षु प्रपतनेषु. ५. MHP चाग्निञ्च. ६. MHP मनव्या°. ७. MHP om; see BaudhŚS 28.11:12 ८. MHP °मानस्य. ९. MHP om. १०-१०. MHP व्यवाये वा दुरिष्टे वा. ११. MP °त्तीयाय, H °तीयाद्यजती. १२. M कलाति°. १३. MHP प्रपततेत्.



प्रमीयेत; वैष्णव्या व्याहृतीभिश्च प्राजापत्यया[१] च हुत्वा तं संवृश्च्याग्नौ प्रहृत्याथान्यः साधयेत्; सैव ततः प्रायश्चित्तिः ॥ ४ ॥ यदि क्रिम्णः क्रिमयो वा भक्षयेयुः पूर्ववत् प्रायश्चित्तम् ॥ ५ ॥ यद्याव्रश्चनमास्कन्देत्[२] पत्न्येनमतिचरिष्यतीति विद्याद्[३], व्याहृत्यादिसमानमुत्तरम् ॥ ६ ॥ यदि दक्षिणा प्रपतेत् प्रत्यक् सं वा शीर्येत शाखासु वा सज्येत वैष्णव्या स्थाने यामी, समानमुत्तरम् ॥ ७ ॥ यद्यप्सु प्रपतेदप्सु म्रियेत वैष्णव्या स्थाने वारुणी, समानमुत्तरम् ॥ ८ ॥ यदि प्रासहा हरेयुः सर्वस्वं दीयेत वैष्णव्या स्थाने ऐन्द्री, समानमुत्तरम् ॥ ९ ॥ यदि मूल उपशुष्कः स्यान्न पितृभ्यो यथापुरं करिष्यतीति [३क]विद्यात्; यदि मध्ये क्षुधा मरिष्यतीति[३क]; यद्यग्रे न स्वर्गं लोकं गमिष्यतीति ॥ १० ॥ यद्यग्निष्ठा विच्छिद्येत यजमानो म्रियेत पद्येत विपरीतं वा ॥ ११ ॥ यदि दक्षिणा गृहे पुत्रा, [४]यद्युत्तरान्वग्ज्येष्ठो[४], यदि दक्षिणपूर्वा ब्रह्मा, यदि दक्षिणापरा होता, यद्युत्तरापराऽध्वर्युर्यद्युत्तरपूर्वाग्नीध्रः; शुष्कादिषु च सर्वेषु याम्यादि, समानमुत्तरम् ॥ १२ ॥ यदि लोहिन्यो लेखा[५] यूपं प्रसव्यं परिपालयेयुर्न साहस्रं क्रतुमाचरिष्यतीति विद्यात्[३]; श्वेताश्चेत् प्रदक्षिणं क्षिप्रं साहस्रं क्रतुमाचरिष्यतीति विद्यात्[३] ॥ १३ ॥ यदाहुतौ[६] हुतायां कृष्णो धूमो दक्षिणां दिशमभिनिहन्याद्वातो वा प्रसव्यं धूममावेष्टयेद् यजमानो म्रियेत; सर्वप्रायश्चित्तं जुहुयात् ॥ १४ ॥ [१३] [इत्येकादशोऽनुवाकः]

अथातोऽनुग्रहस्यैव ॥ १ ॥ सायंहोममुप वोदयञ्जुहुयात्, प्रातर्होममुपास्तमयं वा कालेन कालमनतिक्रम्य[७] ॥ १क ॥ [कालो][८] दर्शपूर्णमासयोरग्निहोत्रस्य च न स्कन्दते न व्यथत इति विज्ञायते ॥ २ ॥ आ प्रातराहुतिकालात्सायमाहुतिकालो नात्येति; आ सायमाहुतिकालात्प्रातराहुतिकालो नात्येति; यदि सायं **'सायं [९]दोषा वस्तोर्नमः स्वाहा'** इति हुत्वाऽथाग्निहोत्रं जुहुयात्; यदि प्रातः **'प्रातर्दोषा[९] वस्तोर्नमः स्वाहा'** इति हुत्वाऽथाऽग्निहोत्रं जुहुयात् ॥ ३ ॥ अथ यदि पूर्वस्यामाहुत्यां हुतायामाहवनीयोऽनुगच्छेत् **'अग्निर्दारौ दारावग्निः'** इति वदञ्छकले हिरण्यं निधायोत्तरामाहुतिं[१०] जुहुयात् ॥ ४ ॥ [११]कालातिक्रमेष्वेवैतद्धोममित्येवमेतद् विद्यात्[३]; [आऽमावास्याकालात् पौर्णमासस्य कालो नातीयादा पौर्णमासादामावास्यस्य][१२]; आ व्रीह्याग्रयणकालाच्छ्यामाकाग्रयणकालो नात्येति; आ यवाग्रयणकालाद् व्रीह्याग्रयणकाल, आ वरुणप्रघासकालाद् वैश्वदेवस्य काल,

१. MHP °पत्या. २. MHP यद्व्याश्चनमास्कन्दे. ३. MHP विन्द्यात्. ३क-३क. H om. ४-४. MHP °त्तरा वा ज्ये°. ५. MHP. लूखा. ६. MHP यदाहुस्तौ. ७. MHP °मति°. ८. MHP om; cf BaudhŚS 29.12 : 2. ९. MHP दोषो. १०. MHP °योत्तरमा°. ११. MHP °क्रमेष्वावद्धोम°. १२. MHP om; cf BaudhŚS 28 : 11-22

आ साकमेधानां कालाद् वरुणप्रघासस्य काल, आ शुनाशीरीयकालात् साकमेधानां काल, आ दक्षिणायनपशुकालादुत्त[१]रायणपशोः काल, [२]ओत्तरायणपशुकालाद्दक्षिणायनपशोः काल इति॥ ५॥ ऋषयो ह स्म प्रयोयुगा[३] [४]आसन्; ते[४]ऽर्धमासायार्धमासायाग्निहोत्रमजुह्वत, चतुर्दशचतुर्दशगृहीतानि, सकृदुन्नयते हविरेका समित्सकृद्धोमोऽर्धमासाय कल्पत इति॥ ६॥ एवं प्रातः। अथ षण्मासानहुतेऽग्निहोत्रे दर्शपूर्णमासाभ्यामनिष्ट्वाऽऽग्रयणैश्चातुर्मास्यैः पशुबन्धेन च; अथाग्नये पथिकृतेऽग्नये वैश्वानरायाग्नये व्रतपतयेऽग्नये तन्तुमत इति पुरोडाशान्निरुप्याग्निहोत्रꣳ हुत्वा दर्शपूर्णमासाभ्यां यजेताग्रयणैश्चातुर्मास्यैः पशुबन्धेन च॥ ७॥ अथ यदि संवत्सरमहुतेऽग्निहोत्रे दर्शपूर्णमासाभ्यामनिष्ट्वाऽऽग्रयणैश्चातुर्मास्यैः पशुबन्धेन च; अथाग्नये पवमानायाग्नये पावकायाग्नये शुचये [अग्नये][४क] पथिकृतेऽग्नये वैश्वानरायाग्नये व्रतपतयेऽग्नये तन्तुमत इति पुरोडाशान्निरुप्याग्निहोत्रꣳ हुत्वा दर्शपूर्णमासाभ्यां यजेताग्रयणैश्चातुर्मास्यैः पशुबन्धेन च॥ ८॥ स यद्यासन्दी शिक्यमगारं वा दह्येत '**वैश्वानरो[४ख] न ऊत्या**' इत्यष्टर्चेन समिधोऽभ्यादध्यात्॥ ९॥ अथ यदि वासतीवरः कलशः[५] पान्नेजन[६] एकधनाः कुम्भेष्टका वा परासिच्येरन् रशना यूपश्चषालो ग्रावाण औदुम्बरी वाऽतिपद्येतान्यद्वाऽनादिष्टं तत् स्वेनस्वेन यजुषा स्वायतने निधायोपधाय वाऽनुमन्त्रयते '**आयुर्मे धारयत**', '**प्राणं मे धारयत**', '[७]**प्रजां मे धारयत**[७], **पशून्मे धारयत, मा म आयुः**[८] **[प्राणः]**[९] **प्रजाः पशवः परासिच्येरन्**' इति॥ १०॥ [**१४**] [इति द्वादशोऽनुवाकः]

स यदि हुताहुतौ सोमौ सꣳसृ[ज्येयाता][१०]माहवनीयादुदीचोऽङ्गारान्निरूह्य तेषु जुहुयाद् '**यज्ञस्य हि स्थ ऋत्वि**[११]**(याविन्द्राग्नी चेतनस्य च। हुताहुतस्य तृप्यतमहुतस्य हुतस्य च॥ हुतस्य चाहुतस्य चाहुतस्य हुतस्य च। इन्द्राग्नी अस्य सोमस्य वीतं पिबतं) जुषेथाꣳ स्वाहा**' इति॥ १॥ तस्य नित्यभक्षमनुवर्तयति '**मा यजमान** [१२]**(तमो विदन्मर्त्विजो मो इमाः प्रजाः। मा यः सोममिमं पिबात् सꣳसृष्टमुभयं) कृतम्**' इति॥ २॥ अथ यद्यन्यहुताश्चमसा अन्यहुतैश्चमसैः सꣳसृज्येरन् सोमꣳ सोमे वाऽभिगृह्णीयादित्येतदेव॥ ३॥ अथ यद्यन्यवृता[१३] ऋत्विजोऽन्यवृतैः स[१४][ꣳसज्येरन्दीक्षिता दीक्षितैर्वा]न्वितादन्यत्र व्रात्यस्तोमात्[१५]

१. MHP °कालामोत्तरा°. २. MHP उत्तरां°. ३. प्रभयुग. ४-४. MHP °सꣳस्थिते. ४क. MHP om. ४ख. MHP. °नरोग्न. ५. MHP कलशं. ६. MHP वान्नेजन. ७-७. MHP twice. ८. MHP आयुषः. ९. MHP om. १०. MHP broken. ११. MHP abr, cf TB III. 7.8.8. १२. MHP abr, see TB III. 7.8.3. १३. MHP °यदन्यपृता. १४. MHP broken: cf BaudhŚS 29.4 : 365. १५. MHP प्रात्यस्तो°.



संत्राच्चेत्येतदेव[१]॥ ४॥ अथ यदि सोमे सुतेऽभिवृष्येत '**तदित्पदं न विचिकेत विद्वान्**', '**प्रत्यस्मै पिपीषते**' इत्येताभ्याꣳ स्रुवाहुती हुत्वा ततो नित्यभक्षं तस्यानुवर्तयति '**इन्दुरिन्द्र**[२]**(मवागादिन्दोरिन्द्रोऽपात्। तस्य त इन्दविन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्ष)यामि**' इति॥ ५॥ अथ यदि सꣳस्थिते सोमे यजमानः प्रमीयेत भयं वाऽऽग[च्छेत् सर्वाणि हवीꣳषि पात्रियाꣳ समवधाय द्रोणकलशे सोमं][३] जुह्वामाज्यं पशुमन्यस्यामित्येकामाहुतिं जुहोति '**ये देवा येषा**[४]**(मिदं भागधेयं बभूव येषां प्रयाजा उतानूयाजाः। इन्द्रज्येष्ठेभ्यो वरुणराजभ्योऽग्निहोतृभ्यो) देवेभ्यः स्वाहा**' इति; हुत्वोर्ध्वं पैतृयज्ञिकं कर्म प्रतिपद्येत; अभये पुनर्यजेत॥ ६॥ अथात्मसमारूढेषु नाप्सु निमज्ज्यान्न मैथुनं व्रजेन्न चण्डालैः सह संभाषेत; [५][यदि कुर्यात् '**इमं मे वरुण**', '**तत्त्वा यामि**', '**त्वं नो अग्ने**', '**स] त्वं नो अग्ने**' इति चतस्रो वारु[६][णीर्जपेत्॥ ७॥ यद्य]स्य कृष्णा[जि][७]नाद् व्यवच्छेदः स्याद् दण्डाद् वा॥ ८॥ [**१५**] [इति त्रयोदशोऽनुवाकः]

'**देवाञ्जनमगन् यज्ञस्ततो मा यज्ञस्याशीरवतु। वर्धतां भूतिर्दध्ना घृतेन मुञ्चतु यज्ञो** [८]**यज्ञपतिमꣳहसः**' इति जपेत्॥ १॥ छर्दयित्वा निष्ठीव्य[९] वा[१०] [११]'**यदत्रापि रसस्य**[११] [१२]**[मे निरष्ठविषमस्तृतम्। अग्निष्टत्सोमः पृथिवी पुनरात्मन्दधातु मे**' इति जपेत्॥ २॥ स्वप्नेऽ]न्नं भुक्त्वा '**यदन्नमद्यते नक्तं न तत् प्रातः क्षुधोऽवति। सर्वं तदस्मान्मा**[१३] **हिꣳसीन्न हि तद्दृशे**[१४] **दिवा**' इति जपेत्॥ ३॥ दुःस्वप्नं दृष्ट्वा [१५][पर्यावर्ते] [१६]**दुःष्वप्न्यात् पापस्वप्न्यादभूत्याः**[१६] **ब्रह्माणमन्तरं करवे न हि स्वप्न उपाकृत**' इति जपेत्॥ ४॥ '**नमो रुद्रेभ्यः स्वाहा**' इति कण्डूयने जपेत्॥ ५॥ न दीक्षितो[ऽन्येन दीक्षितेन][१७] सङ्गच्छेत्; यदि सङ्गच्छेत् '**कया नश्चित्र आ भुवत्**' इत्येतामृचं जपेत्॥ ६॥ अथ यदि देवयजनादन्यत्राभिनिम्रुक्तो वाऽभ्युदितो वा '**सूर्यो मा देवो देवेभ्यः पातु**'[१८] इति [१९][जपेत्॥ ७॥ अ]थ वितते यज्ञे प्रायश्चित्तम्; तदाज्यमौषधं पशुः[२०] पय॰ सोम इति; तेषां विनाशे वा पुनरुत्पाद्य कुर्यात्॥ ८॥ यत्र स्मरेत् प्राक् स्विष्टकृतादुत्पादनं

१. MHP सत्राच्येत्ये°. २. MHP abr, cf TB III. 7.10.6. ३. MHP broken, cf BudhŚS 29.5. ४. MHP abr, cf TB III.7.10.4. ५. MHP broken. ६. MHP broken. ७. MHP broken. ८. MHP यज्ञपीतं मं°. ९. MHP निष्क्रीय. १०. MHP वां. ११-११. MHP यदस्यत्र वीरस्य. १२. MHP broken, cf ĀpŚS X.13.11. १३. MHP °तस्मान्महींसीर्°. १४. MHP तदृशे. १५. MHP om. १६-१६. MHP दुःस्वप्ने पापस्वप्ने च मुक्त्वा. १७. MHP broken. १८. MHP पात्विदेवेभ्यः. १९. MHP broken. २०. MHP पशुं.

विद्यते; तत ऊर्ध्वꣳ स्मरेत् तत् सꣳस्थाप्य तेनैव पुनर्यजेत्, सह यजेद्वा ॥ ९ ॥ यदि निरुप्य स्मरेदन्यदैवतम् **'अमुष्मै त्वा'** इति [1]प्रति[विभज्या]भिमृश्य सर्वं जुहुयाद् **'अमुष्मै स्वाहा'** इति; अथ यत्र स्मरेत् तत्र पूर्ववज्जुहुयादासादनाद्; अथ यद्यासाद्य स्मरेदन्वायात्य स्थाने कुर्यात् ॥ १० ॥ अथैतस्य कर्मणः कथमुपक्रमो भवतीति; भागिनो दैवतस्य शूर्पादानप्रभृति [कर्म][2] कृत्वा श्रपयित्वाऽऽसाद्य स्वस्थाने प्रचरेत्; तत्र मिन्दाहुती[3] जुहुयाद् व्याहृतीभिश्च; सैव ततः प्रायश्चित्तिः ॥ ११ ॥ एवमेव पशोरुपाकरणप्रभृत्या[4] स्विष्टकृतः[5] पूर्वोक्तं जुहुयात् ॥ १२ ॥ अथ यदि सदोहविर्धाने कृष्णशकुनिः [6][पक्षाभ्यामाधून्वानः] पर्यभिपतेदभिनिषीदेद्वा **'इदं विष्णुर्वि चक्रमे'** इत्याहवनीये स्रुवाहुतिं जुहुयात्; अथ यद्युच्चैः पतेन्नैतदाद्रियेत ॥ १३ ॥ [१६] [इति चतुर्दशोऽनुवाकः]

यदि प्रातरनुवाकेऽनुपाकृते[7] सूर्यो[8]ऽभ्युदियात् कथं तत्र प्रायश्चित्तं भवतीति; **'उषाः केतुना जुषताम्'** इत्येतामृचं मिन्दाहुती च व्याहृतीभिश्च हुत्वोपाकुर्यात् ॥ १ ॥ यदि सूर्यो नाविर्भवति प्रातरनुवाकꣳ शस्यमानम् **'उद्वयं तमसस्परि'**, **'उदु त्यं'**, **'चित्रम्'** इत्येताभिस्तिसृभिः स्रुवाहुतीर्जुहुयात् ॥ २ ॥ स यदि ग्रहान् ग्रहीष्यमाणो भागिनीं देवतामगृहीत्वाऽन्यां गृह्णाति तथा **'अमुष्मै स्वाहा'** इति तदानीमेव सर्वं जुहुयाद्, भागिनीं पुनर्गृह्णीयात् ॥ ३ ॥ स यदि ग्रहेषु वा चमसेषु वा व्यापद्द्रवेत्तदपनीय तत्प्रायश्चित्तꣳ हुत्वा तथैव पूर्ववद् गृहीत्वा चमसेषु वा पुनरभ्युन्नीय जुहुयात् ॥ ४ ॥ यदि हुत्वा व्यापद्द्रवेद्धिरण्यमन्तर्धायाप आनीय भक्षयेत्; सैव ततः प्रायश्चित्तिः ॥ ५ ॥ अथ यदि सवनकालमतीयात्[9] **'अग्निर्मूर्धा दिवः'**[10] इत्येतस्यानुवाकस्य प्रथमया गायत्रिया जुहुयात् प्रातःसवने; एवमेव त्रैष्टुभेन[11] माध्यन्दिने सवने; एवमेव जागतेन तृतीयसवने[12] ॥ ६ ॥ अत ऊर्ध्वमतिरात्रादूर्ध्वमधिगच्छेत् सर्वान् होतॄन् जुहुयादिति। विज्ञायते- ब्रह्म वै चतुर्होतार इति; तस्माच्चतुर्होतृनेव जुहुयात्; अत ऊर्ध्वमहः संख्यां [13]नाधिगच्छेदेकाहेषु ॥ ७ ॥ अथ यदि सवनीयानां पशूनां पूतिगन्धः स्यात् पुनरुत्पाद्य कुर्यात्; अपि वोष्णोदकेन प्रक्षाल्याज्येऽवधाय पुनः श्रपयित्वा प्रचरेत्; तत्रापि पूतिगन्धः स्यात् पुनरुत्पाद्य प्रचरेत्; तथा सवनीयानां पुरोडाशानाम् ॥ ८ ॥ अथ यदि

१. MHP broken after प्रति [MSS व्रत]. २. MHP om. ३. MHP °हुतीञ्जु°. ४. MHP भृति. ५. MHP °कृतिवत्. ६. MHP broken; see **Supra** 1.12.7. ७. MHP °नुवाकृते. ८. MHP सूर्या°. ९. MHP सवनमालम°. १०. MHP भुव. ११. MHP त्रैष्टुभौ. १२. MHP सवनेन. १३. MHP नागच्छे°.



स्तोत्रं वा शस्त्रं वोत्सृजेन्मिन्दाहुती हुत्वोपाकुर्यात्; एका स्तोत्रीया वा सूक्तं वर्चो वाऽर्धर्चो वोत्सृजेन्मिन्दाहुती[1] जपेत् ॥ ९ ॥ स्तोत्रादानप्रभृत्या होमाद्[2] वाग्यमः स्यात्; यदि तत्र वाचं विसृजेद् वैष्णवीमृचमनुब्रूयात् **'विष्णो त्वं नो अन्तमः'** इति; स यदाश्राव्य वाचं[3] विसृजेत्तत्रापि तदेव पुनराश्राव्य यजेत् ॥ १० ॥ ऊनातिरिक्तव्याघातपुनरुक्तेष्वन्येषु प्रायश्चित्तेषु मिन्दाहुती उपदिष्टे; वि ह वा एतस्यैव सर्वस्य यज्ञस्य मिन्दाहुती शरीरमिति विज्ञायते ॥ ११ ॥ [१७] [इति पञ्चदशोऽनुवाकः]

स यदि पूर्वपक्षे रात्रावाहिताग्निर्मरणमाशङ्केत सायमाहुतिꣳ हुत्वा तदानीमेव प्रातराहुतिं जुहुयात् ॥ १ ॥ अथ यद्यपरपक्षे सायंप्रातराहुतिभिरेनं पूर्वपक्षं नयद् दर्शं च कुर्यात् ॥ २ ॥ अथ यदि प्रेयादेवमेव प्राशनवर्जं कुर्यात् ॥ ३ ॥ इष्ट्या अविभवे प्रधानदेवताभ्यश्चतुर्गृहीतान्येकैकस्यै देवतायै पुरोनुवाक्या अनुद्रुत्य याज्याभिर्जुहुयात् ॥ ४ ॥ अथ यदि चातुर्मास्यमध्ये सायंप्रातराहुतिभिर्दर्शपूर्णमासाभ्यां चावशिष्टपर्वाण्यवशिष्टानि चातुर्मास्यानि सꣳस्थापयेदविभवे तद्दैवतान्[4] पुरोडाशानामिक्षां पूर्णाहुतिं वा जुहुयात् ॥ ५ ॥ अथ यदि विच्छिन्नाग्निरुत्सृष्टाग्निर्वा म्रियेत तस्य प्राचीनावीत्यायतनान्युद्धृत्यावोक्ष्य दक्षिणाग्रान् दर्भान् सꣳस्तीर्य यजमानायतने प्रेतं निधाय गार्हपत्यायतनेऽरणी निधाय मन्थति **'येऽस्याग्नयो ऽजुह्वतो माꣳसकामाः संकल्पयन्ते[5] यजमानमाꣳसम्[6]। जानन्तु[7] ते हविषे सादिताय स्वर्गं लोकमिमं प्रेतं नयन्तु'** इति; तूष्णीं विहृत्य द्वादशगृहीतेन स्रुचं पूरयित्वा तूष्णीꣳ हुत्वा प्रेतकर्म कुर्यात् ॥ ६ ॥ अथ यद्यरण्योः समारूढेषु म्रियेत पूर्ववदायतनं कल्पयित्वा गार्हपत्यायतन आमात्यमाहृत्य प्रेतस्य दक्षिणं पाणिमभिनिधाय तत्पुत्रो वा भ्राता वा प्रत्यासन्नबन्धुर्वोपावरोहयति[8] **'उपावरोह जातवेदः सुवर्गाय लोकाय नयतु[9] प्रजानन्। आयुः प्रजाꣳ रयिमस्मासु धेहि [10][प्रेताहुतीश्चास्य जुषस्व[11] सर्वाः'** इति; तूष्णीं विहृत्य द्वादशगृहीतेन स्रुचं पूरयित्वा तूष्णीꣳ हुत्वा प्रेतकर्म कुर्यात् ॥ ७ ॥ अथ यद्यात्मसमारूढेषु म्रियेत पूर्ववदायतनं कल्पयित्वैतमन्वारंभयित्वैतं मन्त्रं जपेत् ॥ ८ ॥ अथ यस्याहिताग्नेरग्नयो लौकिकेन वाऽऽरण्येन वा सꣳसृज्येरन्नग्नये संवर्गाय पुरोडाशमष्टाकपालं निर्वपेत्; दिव्येन चेदग्नयेऽप्सुमते पुरोडाशमष्टाकपालं

१. MHP हुतीर् २. MHP °होमोद्. ३. MHP पाचं. ४. MHP तद्देवतान्. ५. MHP सङ्कत्वयन्ते. ६. MP मास°. ७. MHP व्यायन्तु; thus BaudhPS II.5.1; HirŚS 29.4.23. ८. MHP प्रप्रत्या °र्वोवावरो°. ९. MHP नयतु. १०. MHP om; see Baudh PS II. ११. MHP याजुषस्य.

निर्वपेत्; शावाग्निना चेदग्नये शुचये पुरोडाशमष्टाकपालं निर्वपेत्; उपवसथे श्रुतकर्म कृत्वाऽग्नये व्रतभृते पुरोडाशमष्टाकपालं निर्वपेत्॥ ९॥ अग्नावमेध्याभ्याधाने समारोह्य मथित्वाऽग्नीन् विहृत्य त्रिपुरोडाशां पवित्रेष्टिं निर्वपेत्॥ १०॥ [**१८**] [इति षोडशोऽनुवाकः]

अथारणिगतानामात्मगतानामन्वाहितानाꣳ सवनगतानाꣳ सर्वोद्वातानां प्रायश्चित्तिः॥ १॥ अरणिगतं मथित्वा विहारं कल्पयित्वा मनस्वतीं[१] जुहोति॥ २॥ एषा प्रायश्चित्तिरनुगते चाभ्युदिते चाभिनिम्रुक्ते[२] च सोमपाने च सोमातिपवितस्य[२क] च परियष्टुश्च[३]॥ ३॥ यस्य पुरुषो रथोऽश्वो वैणो [४]गौर्महिषो वाराहोऽहिर्मृगः श्वा वाऽन्यद्वा [४]श्वापदमन्तराग्नी गच्छेत्तस्य [५]चाग्नेरेकदेशहरणेष्वन्यासु चाग्निहोत्रस्यार्तिषु चैतामिष्ट्वा वसीयान् भवति॥ ४॥ दक्षिणां प्रतिग्रहीष्यन् सप्तदशकृत्वोऽपान्याद् '**देवस्य त्वा**' इत्यनुद्रुत्य '**प्रतिगृह्णामि**' इति प्रतिगृह्य जपति '**राजा त्वा वरुणो नयतु**' इति; यथालिङ्गमभिमन्त्रयते॥ ५॥ बर्हिषा प्रतीयाद् गां वाऽश्वं [वा][६]; '**वैश्वानरः प्रत्नथा**' इति रथं प्रतिगृह्णाति; '**उत्तानस्त्वाऽऽङ्गीरसः प्रतिगृह्णातु**' इति यत्किञ्च प्राणत्॥ ६॥ [**१९**] [इति सप्दशोऽनुवाकः]

अथारण्योर्व्यापत्तिं व्याख्यास्यामः॥ १॥ अष्टाभिर्निमित्तैर्विनश्यत्यमेध्य-श्वचण्डालपतितशूद्रवायसरासभ[७]रजस्वलाभिः सꣳस्पृश्य। अरण्योर्विनाशेऽग्नि-सहमग्न्याधेयमरणिगतं पुनराधेयम्॥ २॥ नष्टारणी अप्सु निमज्ज्य '**भवतं नः समनसौ**' इति तस्मिन्नरणी शकलीकृत्य [८]मन्थनसामर्थ्यꣳ समारोपणसामर्थ्यं मन्थनशेषं वा प्रमन्थं च कुर्यात् समस्तशल्यवर्जम्॥ ३॥ सन्तिष्ठतेऽरण्योर्व्यापत्तिः॥ ४॥ [**२०**] [इत्यष्टादशोऽनुवाकः]

अथ यद्यन्वाहितानां गार्हपत्य उद्वायेत् पात्रियां[९] चतुर्गृहीतं गृहीत्वाऽऽहवनीये जुहुयात् '**भूर्भुवः सुवः स्वाहा**' इति; आहवनीयादर्धꣳ समुच्य गार्हपत्यस्यायतनाद् भस्मोद्वाप्य गार्हपत्यस्यायतने सादयेत्; '**इषे रय्यै[१०] रमस्व**' इत्येवꣳ समिन्धे; एवꣳ

---

१. MHP °स्वती. २. MHP °म्रुदत्ते. २क. MHP पविताय. ३. MHP पर्यष्टु°. ४-४. MHP गो महिषो वानुडुहोवानड्वान् मृगश्चावान्याश्चाद्वापद°; cf BaudhŚS 27.5.10-11. ५. MHP °ग्नेरेकादश. ६. MHP om. ७. MHP रभस. ८. MHP मन्थसा°. ९. MHP पात्रीयां. १०. MHP रैर्य.



समिध्योपतिष्ठते; तस्मिन्नेतास्तिस्रस्तन्तुमतीर्जुहोति[१], प्राजापत्यां [चतुर्थीं, पूर्णाहुतिं][२] पञ्चमीम्॥ १॥ अथ [३]यद्यन्वाहितानामाहवनीय उद्वायेत् पात्रियां चतुर्गृहीतं गृहीत्वा गार्हपत्ये जुहुयात् '**भूर्भुवः सुवः स्वाहा**' इति; गार्हपत्यादेनमुद्धृत्याहवनीयस्यायतनाद् भस्मोद्वाप्याहवनीयस्यायतने सादयेत्; '**इषे रय्यै[४] रमस्व**' इत्येवꣳ समिन्धे; एवꣳ समिध्योपतिष्ठते; तस्मि[न्ने][५]तास्तिस्रस्तन्तुमतीर्जुहोति[६] प्राजापत्यां चतुर्थीं पूर्णाहुतिं पञ्चमीम्॥ २॥ अथ [७]यद्यन्वाहितानामन्वाहार्य उद्वायेदाहरेयुरेवैनमेताञ्जुहोति॥ ३॥ [**२१**] [इत्येकोनविंशोऽनुवाकः]

**॥ इति यज्ञप्रायश्चित्तं समाप्तम्॥**

---

१. MHP °मर्तीं जु°. २. MHP broken, cf below 1.21.2. ३. MHP यद्यन्वाहुतीना°. ४. M रयैं. ५. MHP broken. ६. MHP °तन्तुमतीञ्जु°. ७. MHP °हितानाम°.

## II. [अथ पाशुकप्रायश्चित्तम्]

तदाहुर्-अध्वर्यो यदि पशुरुपाकृतः पलायेत का तत्र प्रायश्चित्तिः, कथं कुर्यादिति; तद्विदुषा प्रत्युक्तम्; स यदि पशुरुपाकृतः पलायेत चतुर्गृहीतं गृह्णीते; हिरण्यायां वा हिरण्यं वावधाय तज्जुहुयात् **'यस्य भीषा पलायसे ततो नो अभयं कृधि। प्रजाभ्यः सर्वाभ्यो मृड नमो रुद्राय मीढुषे। गातुमस्मिन् यज्ञे यजमानाय धेहि स्वाहा'** इति; तमनुपलाय्य गृह्णीयुरथैतमालभेत, [२][यद्यु न गृह्णीयुरन्यमालभेत]; सैव ततः प्रायश्चित्तिः॥ १॥ तदाहुर्- अध्वर्यो यदि पशुरुपाकृतो म्रियेत का तत्र प्रायश्चित्तिः, कथं कुर्यादिति; तद्विदुषा प्रत्युक्तम्; स यदि पशुरुपाकृतो म्रियेत गार्हपत्ये नैर्ऋतं चरुं श्रपयित्वा नैर्ऋतीभ्यामृग्भ्यामुपस्तीर्णाभिघारितं दर्विहोमं जुहोति **'यत् ते [३][देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविचर्त्यम्। इदं ते तद्वि ष्याम्यायुषो न मध्यादथा जीवः पितुमद्धि प्रमुक्तः॥ यस्यास्ते अस्याः क्रूर आसञ्जुहोम्येषां बन्धानामवसर्जनाय। भूमिरिति त्वा जना विदुर्निर्ऋतिरिति त्वाऽहं परि वेद विश्वतः स्वाहा'** इति]; तं यदत एव मृतमुदञ्चं कर्षेयुः पशुकुणपेन हास्य शवेनेष्टं स्यान्मृतं वै शवं हरन्ति; य एनं तत्र ब्रूयात् पशुकुणपेन न्वा अयं शवेनायष्टः क्षिप्रे न्वा इमं यजमानं मृतमुदञ्चं क्रक्ष्यन्तीति तथा हैव स्यात्; तम[त्रैव पर्यग्निकुर्यात्, पर्यग्निकृतस्य वपामुत्खिद्य तया प्रचरेत्; अथैनमङ्गशः संकृत्योदञ्चं हरेयुर्वैश्वदेवानि वाऽङ्गानि समाप्तेनैवास्य पशुनेष्टं भवति; सैव ततः][४] प्रायश्चित्तिः॥ २॥ तदाहुर्- अध्वर्यो यदि पशु[रुपाकृतो निषी][५]देत् का तत्र [६](प्रायश्चित्तिः, कथं कुर्यादिति; तद्विदुषा प्रत्युक्तम्; स यदि) निषीदेत् तमुदुम्बरशङ्कुनोत्थापयेत् **'उदुस्र[७] तिष्ठ प्रतितिष्ठ[८] मा[९] रिषो मेमं यज्ञं यजमानं च रीरिषः। सुवर्गे [१०](लोके यजमानं हि धेहि शं न एधि द्विपदे शं) चतुष्पदे'** इति चतुर्गृहीतं [११](गृह्णीते; हिरण्यायां वा हिरण्यं वावधाय तज्)जुहुयात्

१. MHP broken. २. MHP broken; see VādhAnvā III.4.1. २क. MHP एवमुदञ्च. ३. MHP broken; cf TS IV. 2.5.8-9. ४. MHP broken; see VādhAnvā III.4.4. ५. MHP broken. ६. MHP abr. as तत्र=निषीदेत्; see above II.1.1 ७. MHP om उस्र. ८. MHP add धनेन after तिष्ठ. ९. MHP मरिषो. १०. MHP abr. cf TB II. 7.8.4. ११. MHP abr. as चतुर्गृहीतं=जुहुयाद्.



**'यस्माद् [१]भयान्यषदस्ततो [२][नो अभयं कृधि। प्रजाभ्यः सर्वाभ्यो मृड नमो रुद्राय मीढुषे। गातुमस्मिन् यज्ञे यजमानाय धेहि स्वाहा'** इति, सैव ततः प्रायश्चित्तिः॥ ३॥ तदाहुर्-अ]ध्वर्यो[३] य[दि][४] पशुरुपाकृत उद्वेपेत निमेहेच्छकृत् कुर्याद्रवेद्वा [विकलाङ्गो वा स्यात्] वपा व्याह्रियमाणास्कन्देत्][६] वपामाह्रियमाणां श्येनो मथ्नीयात् [७][का तत्र प्रायश्चित्तिः, कथं कुर्यादिति; स यदि पशुरुपाकृत उद्वेपेत] चतुर्गृहीतं गृह्णीते; हिर[८](ण्यायां वा हिरण्यं वावधाय तज्जु)हुयाद् **'यस्माद् भयादुदवेपिष्ठास्ततो नो अभयं[९] (कृधि। प्रजाभ्यः सर्वाभ्यो मृड नमो रुद्राय मीढुषे। गातुमस्मिन् यज्ञे यजमानाय) धेहि स्वाहा'** इति; सैव ततः प्रायश्चित्तिः॥ ४॥ [१] [२२] [इति विंशोऽनुवाकः]

अथ यदि पशुरुपाकृतो निमेहेच्चतुर्गृहीतं[१०] [११][गृह्णीते; हिरण्यायां वा हिरण्यं वावधाय तज्जुहुयात् **'यस्माद् भयान्यमि]क्षस्ततो नो [१२](अभयं कृधि। प्रजाभ्यः सर्वाभ्यो मृड नमो रुद्राय मीढुषे। गातुमस्मिन् यज्ञे यजमानाय) धेहि स्वाहा** इति; सैव ततः प्रायश्चित्तिः॥ १॥ अथ यदि पशुरुपाकृतः शकृत् कुर्याच्चतुर्गृहीतं [१३](गृह्णीते; हिरण्यायां वा हिरण्यं वावधाय त)ज्जुहुयात् **'यस्माद् भयाच्छ-कृदकस्ततो नो [१४](अभयं कृधि। प्रजाभ्यः सर्वाभ्यो मृड नमो रुद्राय मीढुषे। गातुमस्मिन् यज्ञे यजमानाय धेहि स्वाहा'** इति; सैव ततः प्राय)श्चित्तिः॥ २॥ अथ यदि पशुरुपाकृतो रवेत तदनुमन्त्रयते **'इन्द्रस्य भागः सुविते[१५] दधातन[१६] इमं यज्ञं यजमानं च सूरौ। यो नो द्वेष्ट्य[नु तं रवस्वानाग][१७]सो यजमानस्य वीराः'** इति; चतुर्गृहीतं [१८](गृह्णीते; हिरण्यायां वा हिरण्यं वावधाय) तज्जुहुयात् **'यस्माद् [१८क]भयादवाशिष्ठास्ततो [१९](नो अभयं कृधि। प्रजाभ्यः सर्वाभ्यो मृड नमो रुद्राय मीढुषे। गातुमस्मिन् यज्ञे यजमानाय धेहि स्वाहा'** इति; सैव ततः प्राय)श्चित्तिः॥ ३॥* अथ यदि पशुरुपाकृतो विकलाङ्गः स्यात् **'अग्निर्मूर्धा', 'भुवः', 'अग्नाविष्णू सजोषसा'** इत्येताभिस्तिसृभिः स्रुवाहुतीर्हुत्वोपाकरोति;

१. MHP भयान्यष°. २. MHP broken. ३. MHP न्धोय. ४. MHP broken. ५. MHP om; thus conjectured by the Editor. ६. MHP °मानाः ७. MHP abr. thus conjectured. ८. MHP abr. ९. MHP abr., cf TB. III. 7.8.5. १०. MHP चतुर्विंश. ११. MHP broken. १२. MHP abr. see above II.1. 3. १३. MHP abr. १४. MHP abr. १५. MHP सविते. १६. MHP दधातु न. १७. MHP broken, cf ĀpŚS VII. 17.2. १८. MHP abr. १८क. MHP °दरोष्ठा. १९. MHP abr. cf TB III.7.8.1. *. MHP give the whole text 'अथ यदि = तन्यूनं भवति' after I. 13.14. The proper place of the text seems to be here; cf BaudhŚS 28.7 : 1-3.

प्राजापत्यया च वैष्णव्या चेत्येके; अथापरमैन्द्रिया च वायव्या चेति; स यथा ह वा एते आहुती; स यन्न्यूनं पशोर्विपतितं न तन्न्यूनं भवति॥ ४॥* अथ यदि वपा व्याह्रियमाणा[१] स्कन्देत् तामभिमन्त्रयेत[२] **'आ त्वा ददे[२] यशसे वीर्याय चास्मास्वघ्निया यूयं दधाथेन्द्रियं पयः'** इति; चतुर्गृहीतं [३](गृह्णीते; हिरण्यायां वा हिरण्यं वावधाय तज्)जुहुयात् **'विश्वा आशा मधुना[४](सꣳसृजाम्यनमीवा आप ओषधयो भवन्तु। अयं यजमानो मृधो व्यस्यतामग्रभीताः पशवः सन्तु स)र्वे[५]। गातुमस्मिन्[६](यज्ञे यजमानाय) धेहि स्वाहा'** इति; सैव ततः प्रायश्चित्तिः॥ ५॥ अथ यदि वपामाह्रियमाणाꣳ श्येनो मथ्नीयाच्चतुर्गृहीतं [७](गृह्णीते; हिरण्यायां वा हिरण्यं वावधाय तं जुहुयात् **'मा नस्तोके तन[८](ये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा) विधेम ते गातुमस्मिन् यज्ञे यजमानाय धेहि स्वाहा'** इति; अथान्यद्वा निष्टपं[९] मेदमाहृत्य[१०] तेन प्रचरेत्; सैव ततः प्रायश्चित्तिः॥ ६॥ [२] [२३] [इत्येकविंशोऽनुवाकः]

**[ ॥ इति पाशुकप्रायश्चित्तम् ॥]**

१. MHP वपामह्रियमाणाꣳ. २-२. MHP मन्त्रयता दतितातददेश. ३. MHP abr. ४. MHP br., see TB II.5.3.9. ५. MHP वे. ६. MHP abr. ७. MHP abr. ८. MHP abr. ९. MHP निष्ठवं. १०. MHP मेद आहृ°.

## III. [अथ सप्रवर्ग्यसौमिकप्रायश्चित्तम्]

अथ यदि सꣳसन्नो यजुष्कृतो महावीरं पद्येत तमनुमन्त्रयेत **'यस्यां दिशि महीयसे ततो नो अभयं कृधि। धामच्छदसि[१] वायुर्भूत्वा सर्वा दिश आ वाहि सर्वा दिशोऽनु वि वाहि सर्वा दिशोऽनु संवाहि'** इति; अथैनमुत्थापयेत् **'उदु तिष्ठ स्वध्वर', 'ऊर्ध्व ऊ षु ण ऊतये'** इत्येताभ्यामन्वृचम् ; उत्थाप्यैते एव जुहुयात् **'ऊर्ध्वस्तिष्ठन्नव मृधो नुदस्व क्षीय सपत्नाँ अपबाधमानः। पार्श्वेन कृत्वा तन्वाऽति जहारो तितिष्मको[१क] अव दुर्मतिꣳ हनत् स्वाहा'; 'उदक् पशो सत्राजित जिग्वजिग्व सूनृतया परिवृतः। चतुश्चक्रा युवतयो रथेना देवो याति भुवनानि पश्यन् स्वाहा'** इति; सैव ततः प्रायश्चित्तिः॥ १॥ अथ यदि विधुर्वा प्रदरो वा जायेतैते एव जुहुयात् **'विधुं दद्राणꣳ[२] समने बहूनां युवानꣳ सन्त [३](पलितो जगार। देवस्य पश्य काव्यं महित्वाऽद्या ममार स ह्यः) समानः स्वाहा'; 'यदृते[४] चिदभिश्रिषः पुरा [५](जत्रुभ्य: आतृदः। सन्धाता सन्धिं मघवा पुरुवसुरिष्कर्ता विह्रुतं) पुनः स्वाहा'** इति; अथान्यया करणीयया[६] मृदाऽभिलिप्य प्रचरेत्; सैव ततः प्रायश्चित्तिः॥ २॥ अथ यदि भिद्येतैतानि जुहुयात् **'अभिन्नो घर्मो जीरदानुः', 'त्रयस्त्रिꣳशत्तन्तवः', 'पुनरूर्जा', 'सह रय्या', 'मा[७] नो[७] घर्म व्यथितो [८](विव्यथो नः। मा नः परमधरं मा रजोऽनैः मोष्वस्माꣳस्तमस्यन्तरा धाः मा रुद्रियासो अभिगु)र्वृधानः[९] स्वाहा' ; 'मा नः क्रतुभिर्हीडितेभि[१०](रस्मान् द्विषा सुनीते मा परा दाः। मा नो रुद्रो निर्ऋतिर्मा नो अस्ता मा द्यावापृथिवी हीडि)षाताꣳ स्वाहा'; 'उप नो मित्रावरुणा[११](विहावतमन्वादीध्याथामिह नः सखाया। आदित्यानां प्रसितिर्हेतिरुग्रा शतापाष्ठा घ विषा परि णो) वृणक्तु स्वाहा** इति; अथोपशये यजुर्वदेत् करणयजुस्तपनयजुः पचनयजुराच्छृन्दनयजुरिति; एतेन प्रचरेदथवा यजुष्कृतमवाञ्जनं पिष्ट्वाऽन्यया[१२] करणीयया[६] मृदा सꣳसृज्य कृत्वा पक्त्वाच्छृद्य प्रचरेत्; उपशय एवैनं कुर्वीत; सैव ततः प्रायश्चित्तिः॥ ३॥

१. MHP °च्छन्दसि. १क. MHP तिष्मको. २. MHP दध्राणं. ३. MHP abr; cf TĀ IV. 20.6. ४. MHP यमते. ५. MHP abr; cf TĀ IV. 20.7. ६. MHP करुणी°. ७-७. MHP मनो. ८. MHP abr; cf TĀ IV. 20.10. ९. MHP वृधासः. १०. MHP abr; cf TĀ IV. 20.11. ११. MHP abr; cf TB III. 7.13.11; TĀ IV. 20.12. १२. MHP °न्याया.

अथ यदि घर्माय दुह्यमाने पयो न स्यात् स्रुवाहुतिं जुहुयात् '**अयाश्चाग्ने**[१]**(ऽस्यनभिशस्तिश्च सत्यमित्त्वमयासि। अयाः सन् मनसा कृतोऽयाः सन् हव्यमूहिषेऽया नो धेहि) भेषजꣳ स्वाहा**' इति; अथान्यत् पय आनीय तेन प्रचरेत्; सैव ततः प्रायश्चित्तिः॥ ४॥ अथ यदि प्रवर्ग्येण प्रचरतामादित्योऽस्तमियादपरस्यां द्वारि सुवर्णꣳ हिरण्यं प्रबध्य गार्हपत्ये [१क]स्रुवाहुतीर्जुहुयात् ['**उद्वयं तमसस्परि**]',[१ख] '**उदु त्यम्**', '**चित्रम्**' इति; अथ प्रचरेत्; श्वोभूत आदित्यमुपतिष्ठते '**वयः** [२]**सुपर्णा उपसेदुरिन्द्रम्**' इति; सैव ततः प्रायश्चित्तिः॥ ५॥ अथ यदि घर्माय दुह्यमाना[२क] स्कन्देत् तामनुमन्त्रयेत '**यदरूची विचक्रमे यदशिक्षत् पुरोवसुः। उर्व्याः पदो वि चक्रमे हारुहावदधीतमिमम्**' इति; अथान्यां[३] दुग्ध्वा तस्या एव पयसा प्रचरेत्; सैव ततः प्रायश्चित्तिः॥ ६॥ [१][२४] [इति द्वाविंशोऽनुवाकः]

अथातो दीर्णप्रवृत्तानामेव॥ १॥ स यद्याधवनीयो[४] दीर्येत परिदीर्येत राजानं परिलिप्सेत; तस्याशयेऽन्यं प्रतिनिदध्यात् '**यदृते चिदभिश्रिषः**' इति; तस्मिन् स्वधाꣳ सिञ्चति [५]स्वधां त्रिरञ्जुलिनोपर्युपरि[५] '**सं त्वा सिञ्चामि यजुषा** [६]**(प्रजामायुर्धनं च। बृहस्पतिप्रसूतो यजमान इह) मा रिषत्**' इति; परिलब्धꣳ राजानमानीयैकधनेभ्यो मात्रां गमयित्वा त्रिः सꣳसिच्य स्कन्नानुमन्त्रणेनानुमन्त्रयते '**ऋतस्य वर्तनीरनुवर्तस्व सत्यस्य योनिः प्रजापतिरध्यस्तात्। प्र यज्ञोऽजनिष्ट प्र यज्ञपतिरजनिष्ट प्राहमजनिष्ट**', '**भूपतये स्वाहा, भुवनपतये स्वाहा, भूतानां**[७] **पतये स्वाहा**', '**भूतिः सोमेन वर्धताम्**' इति; तिस्र आग्नीध्रीये जुहोति '**विधुं दद्राणं**', '**द्वौ समुद्रौ**', '**द्वे द्रधसी**[८]' इति॥ २॥ अथ यदि प्रवर्तेत तूष्णीमेव प्रत्युच्छ्रित्यैकधनेभ्यो मात्रां गमयित्वा त्रिः सꣳसिच्य स्कन्नानुमन्त्रणेनानुमन्त्र्य द्वे आहुती जुहोत्यन्ये दद्राणवत्या॥ ३॥ अथ यदि परिणेजति माषपिष्टैर्वा यवपिष्टैर्वा परिलिम्पति॥ ४॥ अथ यदि पूतभृद्[९] दीर्येत तस्या एष कल्पः[१०]॥ ५॥ [११]अथ यदि[११] द्रोणकलशो दीर्येत तस्या एवैष कल्पः[१०]; आहवनीयेऽत्र जु[होति स][१२] याः काश्च; तत ऊर्ध्वं दीर्णप्रवृत्तानामाहुतयो हूयन्ते; आहवनीय एवैताः सर्वा जुहोति॥ ६॥ अथ यदि॥ ७॥ [२] [२५]

---

१. MHP abr; cf MS I. 4.3., Āp MP I. 5.18, TB II 4.1.9. १क. MHP हुतिञ्जु°. १ख. MHP om; cf. **supra I.** 6.12; 17.2. २. MHP सुवर्णा. २क. MHP मानाꣳ. ३. MHP °न्यं. ४. MHP °नीयं. ५-५. MHP स्वधान्त्र रजलिनो°. ६. MHP abr; cf TS. I.6.1.1. ७. MHP भूतां. ८. MHP द्रघसी. ९. MHP om द्. १०. MHP कत्वो. ११-११. MHP broken; thus H. १२. MP broken.



अथ यदि क्षुद्रकाणामेकपाति दीर्येत तस्याशयेऽन्यं प्रतिनिदध्यात् '**यदृते चिदभिश्रिषः**' इति; तस्मिन् स्वधाꣳ सꣳसिच्य आग्रयणादप्तुं प्रस्कन्द्यात्; अथैनं द्रोणकलशाद् गृह्णाति यद्यसंपवितो राजा; यदि संपवितः पूतभृतः; स्कन्नानुमन्त्रणेनानुमन्त्र्य द्वे आहुती जुहोत्यन्ये दद्राणवत्या; अथ यदि परिणेजतीति[१] समानम्॥ १॥ अथ यद्याग्रयणो दीर्येत तस्याशयेऽन्यं प्रतिनिदध्यात् '**यदृते चिदभिश्रिषः**' इति; तस्मिन् स्वधाꣳ सꣳसिच्याधवनीयादप्तुं[२] प्रस्कन्द्याथैनं द्रोणकलशाद् गृह्णाति यद्यसंपवितो राजा; यदि संपवितः पूतभृतः; स्कन्नानुमन्त्रणेनानुमन्त्र्य चतस्र आहुतीर्जुहोति '**विधुं दद्राणम्**', '**आयुष्टे**', '**आयुर्दा अग्ने**', '**ये देवा दिव्येकादश स्थ**' इति; चतस्रः प्रवर्ते जुहोत्यन्या दद्राणवत्या; अथ यदि परिणेजतीति समानम्॥ २॥ अथ यद्येतयोर्ग्रहयोरन्यतरो दीर्येतालमेकग्रहप्रायश्चित्तायै॥ ३॥ अथ यद्युभावेव[३] दीर्येयाताꣳ समेऽवस्थापयेत्, पुनर्यज्ञ एव॥ ४॥ अथ यद्यृते वसतीवरीकाणि दीर्येरन् वसतीवरीभ्य आग्रयणं गृह्णीयात्; आग्रयणादि][४]तरेभ्योऽधि प्रस्कन्दयति; समानो होमः समानो मन्त्रो[ऽनुपूर्वं][५] पुरोरुचः सꣳस्थापयति, पुनर्यज्ञ एव॥ ५॥ अथ यदि वसतीवरीकाणि दीर्येरन् यत्र वसतीवरीकाणि[५क] दीर्येरꣳस्ततो मृत्पिण्डमवधाय पुनर्वसतीवरीर्गृह्णीयात्; वसतीवरीभ्य आग्रयणं गृह्णीयात्; आग्रयणादितरेभ्योऽधि प्रस्कन्दयति; समानो होमः समानो मन्त्रोऽनुपूर्वं पुरोरुचः[६] सꣳस्थापयति, पुनर्यज्ञ एव॥ ६॥ [३] [२६] [इति त्रयोविंशोऽनुवाकः]

यदि ध्रुवो दीर्येत तस्याशयेऽन्यं प्रतिनिदध्यात् '**यदृते चिदभिश्रिषः**' इति; तस्मिन् स्वधाꣳ सꣳसिच्याग्रयणादप्तुं प्रस्कन्द्याथैनं द्रोणकलशाद् गृह्णाति यद्यसंपवितो राजा; यदि संपवितः पूतभृतः; स्कन्नानुमन्त्रणेनानुमन्त्र्य पञ्चाहुतीर्जुहोति '**विधुं दद्राणम्**', '**आयुष्टे**', '**आयुर्दा**[७] **अग्नेऽस्यायुर्मयि धेहि स्वाहा**', '**आयुष्मद्रथन्तरं ब्रह्मणः** [८]**परस्तात्तन्नचो ह्यरिष्टयै**[८] **स्वाहा**', '**मूर्धानं दिवो अरतिं पृथिव्याः**' इति; चतस्रः प्रवर्ते जुहोत्यन्या [९]दद्राणवत्या; अथ यदि परिणेजतीति समानम्॥ १॥ *अथ यद्येतयोर्ग्रहयोरन्यतरो

---

१. MHP परिणेददीति. २. MHP °धवनीय दप्तुं. ३. MHP यद्युभ...वे. ४. MP broken. ५. MHP broken. ५क. MHP °वरयो. ६. MHP पुरूरुचः. ७. MHP आयुर्गायत्र. ८-८. H °चोत्परिष्ट्यै. ९. MHP द्रोणवत्या° *MHP Text between star marks seems to be repetion, see above III. 3.3-6.

दीर्येतालमेकग्रहप्रायश्चित्तायै॥ २॥ अथ यद्युभावेव दीर्येयाताः समेऽस्वथापयेत्, पुनर्यज्ञ एव॥ ३॥ अथ यदृते वसतीवरीकाणि दीर्येरन् वसतीवरीभ्य आग्रयणं गृह्णीयात्; आग्रयणादितरेभ्योऽधि प्रस्कन्दयति; समानो होमः समानो मन्त्रोऽनुपूर्वं पुरोरुचः सꣳस्थापयति, पुनर्यज्ञ एव॥ ४॥ अथ यदि वसतीवरीकाणि दीर्येरन् यत्र वसतीवरीकाणि दीर्येरꣳस्ततो मृत्पिण्डमवधाय पुनर्वसतीवरीर्गृह्णीयात्; वसतीवरीभ्य आग्रयणं गृह्णीयात्; आग्रयणादितरेभ्योऽधि प्रस्कन्दयति; समानो होमः समानो मन्त्रोऽनुपूर्वं पुरोरुचः सꣳस्थापयति, पुनर्यज्ञ एव॥ ५॥* [४][२७] [इति चतुर्विंशोऽनुवाकः]

**[॥ इति सप्रवर्ग्यसौमिकप्रायश्चित्तम्॥]**

**॥ इति वाधूल-यज्ञप्रायश्चितं समाप्तम्॥**[१]

१. MHP वाधूलगृह्यकल्पः समाप्तः. Here the composite MS M and all its transcripts come to an end.



## APPENDIX–I

# परिशिष्ट-1 : वाधूलश्रौतसूत्रे प्रायश्चित्तम्

*(Texts dealing with Prāyaścittas in the Vādhūla-Śrautasūtra*[1]*)*

**[३. १. ३४-३६; ३९ : विच्छिन्नप्रायाश्चित्तिः]**

अथातो विच्छिन्नप्रायश्चित्तिः ॥३४॥ स यद्यस्मै प्रोषुषे काञ्चिद् यज्ञार्तिमाचक्षीरन्नभि वाऽस्तमगादभि वोदगादभि वोदहार्षुरुद्धृतो वोदवासीद् अनो वा रथो वा व्ययासीद् अग्निहोत्री वा न्यसदद् अग्निहोत्रे वाऽधिश्रिते चान्तरेणागादित्यन्यां वैवंरूपां काञ्चिद् यज्ञार्तिमाचक्षीरन् गार्हपत्य आज्यं विलाप्योत्पूय स्रुवं च स्रुचं च संमृज्य प्राडेत्याहवनीयस्यार्धं चतुर्गृहीतं गृह्णीते ॥ ३५॥ तज्जुहोति 'मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु। या इष्टा उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन स्वाहा' इति ॥ ३६॥.... तन्नु ह स्मैतत् पूर्वे श्रोत्रिया यत्र क्व च दशतꣳ रात्रीरतिप्रोषुस्तद् विच्छिन्नरूपमेव मेनिरे; ते ह स्मैतां जुह्वति॥ ३९॥

**[३. ४. ५८-६० :]**

अथो इदमाहुर्-. यदि गावो यजुषाऽपाकृतानां धयेयुर्वा नंश्येयुर्वा प्रायश्चित्तिः कार्या स्यादिति॥ ५८॥ सायमेव यजुषा शाखामाहृत्य यजुषा वत्सानपाकरोति ॥ ५९॥ प्रातर्ह स्मैवम्॥ ६०॥

**[३. ५. ९-१४ : नष्टकपालप्रायश्चित्तिः]**

अथातः कपालस्यैव नष्टस्य ॥९॥ तद्धै ब्राह्मणं भवति 'यद्येकं कपालं = मेककपालम्' इति ॥१०॥ तदाहुर्-यदेतस्यै प्रायश्चित्तीया इष्टेर्नश्येन्न ततः प्रायश्चित्तिश्च नातिशिष्येत इति॥११॥ गार्हपत्ये स्रुवाहुतिं जुहुयात् 'त्रयस्त्रिꣳशत्तन्तवो ये = एतद् दधामि स्वाहा' इति॥ १२॥ अथान्यत् प्रतिनिदधाति 'घर्मो देवाँ अप्येतु' इति नु यद्युपहितानाम् ॥१३॥ अथ यद्युद्वास्यमानानामेतामेव जुहुयात् 'त्रयस्त्रिꣳश=स्वाहा', 'घर्मो देवाँ अप्येतु स्वाहा' इति ॥१४॥

**[३. ५. १५ : भिन्नकपालप्रायश्चित्तिः]**

अथातः कपालस्यैव भिन्नस्य॥१५॥ स यद्यप्रोक्षितानां भिद्येतान्यदाहृत्याथ चेष्टेत्॥१६॥ अथ यदि प्रोक्षितानां भिद्येत गार्हपत्ये स्रुवाहुतिं जुहुयात् 'अभिन्नो घर्मो = रन्ति स्वाहा' इति ॥१७॥ अथाऽन्यत् प्रतिनिदधाति 'यदृते चिदभिश्रिषः = पुनः' इति ॥१८॥ अथैनद् भस्मन्नुपोहति ॥१९॥

1. 'Vādhūla-Śrautasūtram', critically edited by Prof. B.B. Chaubey, Katyayan Vaidik Sahitya Prakashan, Hoshiarpur, 1993.

**[३.५.२०-२४ : दीर्णपात्राणां प्रायश्चित्तिः]**

अथातः पात्राणामेव दीर्णानाम् ॥२०॥ स यद्यप्रोक्षितानां दीर्येतान्यदाहृत्याथ चेष्टेत् ॥२१॥ अथ यदि प्रोक्षितानां दीर्येत तस्य नेदीयो वा दीर्येत गार्हपत्ये स्रुवाहुतिं जुहुयात् 'विधुं दद्राणꣳ समने बहूनां युवानꣳ सन्तं पलितो जगार। देवस्य पश्य काव्यं महित्वाऽद्या ममार स ह्यः समानः स्वाहा' इति॥ २२॥ अथान्यत् प्रतिनिदधाति 'यदृते चि = नः' इति ॥२३॥ यदि दारुमयमन्वेनत् प्रहरति; अथ यन्मृन्मयं भस्मन्नेवैनदुपोहति॥ २४॥

**[३. ६. १-१३ : स्कन्नसान्नाय्यप्रायश्चित्तिः]**

अथातः सान्नाय्यस्य स्कन्नस्य ॥१॥ तन्नु हैतदेके स्वधाꣳ समिव सिञ्चन्ति 'सं त्वा सिञ्चामि यजुषा' इति ॥२॥ मीमांसैषा ॥३॥ उदपात्रमुपनिनीयानुमन्त्रयेत 'भूपतये स्वाहा, भुवनपतये स्वाहा, भूतानां पतये स्वाहा' इति ॥४॥ यद्यलं प्रचरणाय स्यात् प्रचरेत् ॥५॥ यदि सन्ततिरतिशिष्येत तूष्णीं भूयोऽभ्यानीय प्रचरेत् ॥६॥ अथ यदि सर्वमेव स्कन्देत् सान्नाय्यावृता सान्नाय्यं दोहयेत् ॥७॥ अथ यदि सर्वमेव भिद्येत 'विधुं दद्राणम्' इत्येतया हुत्वा 'यदृते चिदभिश्रिषः' इत्येतया प्रतिनिधाय सान्नाय्यावृतैव सान्नाय्यं दोहयेत् ॥८॥ अथ यद्यमेध्यतां नीयाच्छ्वा वा पिबेत् कृष्णशकुनो वा कीटो वा प्रपतेदप एनदभ्यवहृत्य निर्णिज्य स्थालीं मार्जयित्वा सान्नाय्यावृतैव सान्नाय्यं दोहयेत् ॥९॥ गथुनसो हार्क्षकायणस्य हस्ती सान्नाय्यं पपौ। स ह स्म पर्यस्तश्चङ्क्रम्यते यन्मर्या इत्थमवेदिष्यामो हस्ती नः सान्नाय्यं पातेत्यन्वस्य प्रायश्चित्तिमवक्ष्यामहीति ॥१०॥ तदु होवाचानुबुध्योद्दालक आरुणिः। अल्पो मर्या गग्लना आस य एतावन्न विदाञ्चकार। यज्ञो वै यज्ञस्य प्रायश्चित्तः, सान्नाय्यावृत् सान्नाय्यस्याग्निहोत्रावृदग्निहोत्रस्येति ॥११। सान्नाय्यावृत्ता सानाय्यं दोहयेदिति ॥१२॥ सान्नाय्यावृतैव सान्नाय्यं दोहयति॥ १३॥

**[३. ६. १४-२६ : स्कन्नाज्यप्रायश्चितिः]**

अथात आज्यस्यैव स्कन्नस्य ॥१४॥ तन्नु हैतदेके स्वधाꣳ समिव सिञ्चति 'सं त्वा सिञ्चामि यजुषा' इति ॥१५॥ मीमांसैषा ॥१६॥ उदपात्रमुपनिनीयान्वेवैतेन मन्त्रयेत 'भूपतये=स्वाहा' इति ॥१७॥ यद्यलं प्रचरणाय स्यात् प्रचरेत् ॥१८॥ यदि सन्ततिरतिशिष्येत तूष्णीं भूयोऽभ्यानीय प्रचरेत् ॥१९॥ अथ यदि सर्वमेव स्कन्देदन्यदाहृत्य निरुप्याथ चेष्टेत् ॥२०॥ अथ यदि सर्वमेव भिद्येत 'विधुं दद्राणम्' इत्येतया हुत्वा 'यदृते चिदभिश्रिषः' इत्येतया प्रतिनिधायान्यदाहृत्य निरुप्यैवाथ चेष्टेत् ॥२१॥ अथ यदि गृहीतानां स्कन्देदुदपात्रमुपनिनीयान्वेवैतेन मन्त्रयेत 'भूपतये = स्वाहा' इति ॥२२॥ यद्यलं प्रचरणाय स्यात् प्रचरेत् ॥२३॥ यदि सन्ततिरतिशिष्येत तूष्णीं भूयोऽभ्यानीय प्रचरेत् ॥२४॥ अथ यदि सर्वमेव स्कन्देद्यस्या अभिस्कन्देत्तस्या



यजुर्भिर्गृह्णीयात् ॥२५॥ अथ यदि सर्वमेव भिद्येत 'विधुं दद्राणम्' इत्येतया हुत्वा 'यदृते चिदभिश्रिषः' इत्येतया प्रतिनिधाय तस्या एव यजुर्भिर्गृह्णीयात् ॥२६॥

**[६. ४. २३-३१ : आग्निष्टोमिकदक्षिणानां समुदाकृतानां प्रायश्चित्तिः]**

स यदि दक्षिणानां समुदाकृतानां प्र वा पतेन्नश्येद् वा तामेष्टवै ब्रूयात् ॥२३॥ तां यदि न विन्देयुः 'वायवे त्वा' इति तामनुदिशेत् ॥२४॥ 'वरुणाय त्वा' इति तां यदैव म्रियेत पाशो वा हन्यात् ॥२५॥ 'निर्ऋत्यै त्वा' इति तां या सं वा शीर्येताव वा सीदेत् कर्तं वा प्रपतेत् ॥२६॥ 'रुद्राय त्वा' इति तां या पौरुषो वा वधो हन्यान्महादेवो वा ॥२७॥ 'मृत्यवे त्वा' इति तां या नद्धकं म्रियेत ॥२८॥ सा येयं प्रपतिता स्यात्तां यदि विन्देयुर्नैनां दक्षिणास्वप्यपाकुर्यात् न गोष्ठे ॥२९॥ प्रतिवेशां रक्षितवै ब्रूयात् ॥३०॥ तां दक्षिणानां कालेऽनृत्विजे ब्राह्मणाय दद्यात्॥ ३१॥

**[६. ४. ३३-५२ : दीक्षित-प्रायश्चित्तम्]**

स यदि दीक्षितमयोग उपेयात् तप्त्वा व्रतानि वत्सान् संबध्य समारोह्याग्नीन् 'भद्रादभि श्रेयः प्रेहि' इति प्रयायात् ॥३३॥ 'अथेमवस्य' इत्यवस्येत् ॥३४॥ एते एव दीक्षितस्य योगावसाने ॥३५॥ स यदि वहन्तीरपोऽधिगच्छेत् ता एनꣳ सं वा वहेयुः सं वा हरेयुः ॥३६॥ न त्वपोऽवक्रामेत् ॥३७॥ द्वौ लोष्टावाददीत ॥३८॥ तयोरन्यतरमप्सु प्रास्येद् 'देवीरापो अपां नपाद्यः =माऽवक्रमिषम्' इति ॥३९॥ 'अच्छिन्नं तन्तुं पृथिव्या अनु गेषम्' इत्यन्यतरं समुह्यमानो वा सꣳह्रियमाणो वा विशातयेत् ॥४०॥ यल्लोष्टस्यावच्छिष्येत तत्पारे न्यस्याधितिष्ठेत् 'अस्यै मा योषम्' इति ॥४१॥ स यत्रैव वत्स्यन् यक्ष्यमाणः स्यात् तदेतानि कर्माणि कुर्यात्॥ ४२॥ तदेव यजमानमभिमन्त्रयते॥ ४३॥ यद्युद्विजेत्तत्स्तम्बाहुतिं जुहुयात् ॥४४॥ स यदि दीक्षितोऽमेध्यं पश्येत् 'अबद्धं मनः' इत्येनं वाचयेत्। '°दरिद्रं मा मा हासीः' इति॥ ४५॥ अथ यद्येनमभिवर्षेत् 'उन्दतीर्बलं धत्त' इत्येनं वाचयेत्। '°ओजो धत्त बलं धत्तौजोदाः स्थ बलदा मा मे दीक्षां मा तपो निर्वधिष्ट' इति॥ ४६॥ यद्यश्रु प्रपतेत् 'कृपा आपः स्थ स्वाहाकृताः पृथिवीं गच्छत' इति ता अनुमन्त्रयते ॥४७॥ यंदि स्निहानं कुर्यात् 'मुदा आपः स्थ स्वाहाकृताः पृथिवीं गच्छत' इति ताः ॥४८॥ यदि सेभुं कुर्यात् 'बीभत्सा आपः स्थ स्वाहाकृताः पृथिवीं गच्छत' इति ताः ॥४९॥ यदि स्वेदः प्रपतेत् 'तपस्या आपः स्थ स्वाहाकृताः पृथिवीं गच्छत' इति ताः ॥५०॥ यदि मूत्रं वा पुरीषं वा कुर्यात् 'अꣳहोमुच आपः स्थ स्वाहाकृताः पृथिवीं गच्छत' इति ताः ॥५१॥ यदि रेतः सिञ्च्यात् 'रेतःसिचः आपः स्थ स्वाहाकृताः पृथिवीं गच्छत' इति ताः ॥५२॥

**[११.९.४-६ : आश्वमेधिकप्रायश्चित्तम्]**

अश्वागमनीयामिष्टिं निर्वपति यद्यश्वोऽनागतः स्यात्॥ ४॥ यदि च त्वेवागतः स्याद्यदि

चानागत उभयेनैव निर्वपति॥ ५॥ यद्यनागतः स्यादश्वशकान् शालाग्निषूपकिरेद् गार्हपत्येऽन्वाहार्यपचन आहवनीये॥ ६॥

[१४.१.११-१४; ३४-३७ : **दीक्षितप्रायश्चित्तम्**]

न दीक्षितं बहिर्वेद्यभ्यस्तमियान्नो अभ्युदियात् ॥११॥ तं यद्यभि वाऽस्तमियादभि वोदियादेवमेवेच्छेत ॥१२॥ न दीक्षितं सन्तमभ्यस्तमियान्नो अभ्युदियात्॥ १३॥ तं यद्यभि वाऽस्तमियादभि वोदियादुपहवमेवेच्छेत ॥१४॥... (न दीक्षितः)सꣳसर्गमियात्॥ ३४॥ स उ चेत्सꣳसर्गमियात् प्रायश्चित्तं कुर्वीत ॥३५॥ आख्यातमेव प्रायश्चित्तम् ॥३६॥ तमु ते यथाकृत्यं मन्येरꣳस्तथा कुर्युः प्र वा व्राजयेयुः पुनर्वा दीक्षयेयुः ॥३७॥

[१४. २. २९-३३]

न क्रुध्येद्दीक्षितः॥२९॥ स उ चेत्क्रुध्येन्न दण्डं बध्नीयात्॥३०॥ यदि दण्डं बध्नीयात् प्रायश्चित्तं कुर्वीत ॥३१॥ 'त्वमग्ने व्रतपा असि' इत्याहवनीयमुपतिष्ठेत ॥३२॥ कैशिनीभिरादित्यम् 'नमस्त आदित्य त्वं दीक्षितोऽसि स दीक्षमाणानां तेज इन्द्रियं वीर्यं यश आदत्ते। सैषा मम दीक्षमाणस्य तेज इन्द्रियं वीर्यं यश आदत्ते' इति ॥३३॥

[१४. ४.११-१२; १७-३८; ५.१-३]

अत्र संभिन्नं न दीक्षितमभिवर्षेत् ॥११॥ अथ यद्येनमभिवर्षेद् 'उन्दतीर्बलं धत्त' इत्येतद् यजुर्जपेत्। '°ओजो धत्त बलं धत्तौजा स्थ बलदा मा मे = धिष्ट' इति ॥१२॥ ....अथ प्रपद्योपहतकृष्णाजिनं प्रतिमुञ्चीत॥१७॥ जपत्येवैतद्यजुः॥१८॥ न सुहितः स्यान्न प्रष्ठीलाꣳ शयीत॥१९॥ स यदन्धोऽहं न सुहितः स्यान्न प्रष्ठीलाꣳ शयीत, नास्य रेतः स्कन्देदिति॥२०॥ अस्कन्ददध्यो एवैषा परिबार्हतस्य चेत् स्वप्सु स्कन्देत् 'यन्मे अस्य पयसः परितर्पिथ। अग्निहोत्रं चैव सोमेन तदपां पुनरा ददे॥ यदन्नमद्यते सायं न तत् प्रातः क्षुधोऽवति। सर्वं तदस्मान्मा हिꣳसीर्नहि तद् ददृशे दिवा' इति॥२१॥ न ष्ठीव्येद् दीक्षितः॥२२॥ स उ चेत् ष्ठीव्येत् 'यदत्रापि रसस्य मे निरष्ठविषमस्तृतम्। अग्निष्टत् सोमः पृथिवी पुनरात्मन् दधातु मे' इति जपेत्॥२३॥ न छर्दयेत ॥२४॥ तमु चेच्छर्दिका विन्द्याद्यथाशाकं दिधारयिषेत॥२५॥ अथ यदि शक्नुयाद्धारयितुं चात्वालं वा जघनेन गार्हपत्यं वा परिधिं कृत्वा छर्दयेत ॥२६॥ तद् गुहा कुर्यात् ॥२७॥ अथाप आचम्यैतमेव जपं जपेत्॥२८॥ अथ यदि न शक्नुयाद्धारयितुं त्वरमाण आद्रुत्य चात्वालं वा जघनेन मार्जालीयं वा परिधिं कृत्वा छर्दयेत ॥२९॥ तद् गुहा कुर्यात् ॥३०॥ अथाप आचम्यैतमेव जपं जपेत्॥३१॥ अथ यदि न शक्नुयादाव्रजितुं तदेव छर्दयेत ॥३२॥ परिखाय पर्णसेन उपनह्य चात्वालं वा जघनेन वा मार्जालीयं वा = तद् गुहां कुर्यात् ॥३३॥ अथाप आचम्यैतमेव जपं जपेत् ॥३४॥ अथ यदि न शक्नुयादाहर्तुं तदेव तद् गुहा कुर्यात् ॥३५॥ अथाप आचम्यैतमेव जपं जपेत्॥३६॥ अथ यद्येषां कश्चिदुपतापो विन्द्याद्



विसꣳस्थितसञ्चरेणैनं नीत्वाऽऽग्नीध्रे भिषज्येत॥३७॥ तममिभृशेत् 'परीमं परि ते ब्रह्मणे देहि ब्रह्म परिददातु देवताभ्यः। वषट्कारस्त्वाभिषज्यतु सह विश्वैर्देवैः। वसव एतद्वः प्रातःसवनं तद्रक्षध्वं (एतद्वो माध्यन्दिनं सवनं विश्वेदेवा; एतद्वस्तृतीयसवनम्। तद्रक्षध्वं तदभिषज्यत तद् गोपायत तद्वो माऽभ्यवच्छेत्, रुद्रा एतद्वो माध्यन्दिनं सवनं तद्रक्षध्वं = तद्वो माऽभ्यवच्छेत्; आदित्या एतद्वस्तृतीयसवनं तद्रक्षध्वं=तद्वो माऽभ्यवच्छेत्' इति॥३८; ५.१॥ आशास्य यदगदः स्यादित्येवमेव जपेत्॥२॥ स उ चेदणिमानं नीयान् मनुष्यो वै यत्रैतदध्वयुर्वसतीवरीष्ववनयति चात्वालस्यान्ते तासां विषाविषारमुप संगृह्य पाणिना वा चमसेन वाऽऽहृत्यानुषिच्यात् 'आपः प्रजापतिर्यज्ञाय प्राणस्य दोषं न मज्जसि' इति ॥३॥

APPENDIX–II

# परिशिष्ट-2 : वाधूल-अन्वाख्याने प्रायश्चित्तम्

*(Texts dealing with Prāyaścittas in the Vādhūla-Anvākhyāna[1])*

## २.१.५-६ [ अग्निहोत्रप्रायश्चित्तम् ]

स यो ह वा एवंविदं जुह्वतः स्कन्नेऽग्निहोत्र उप वा मीमांसेतानु वा व्याहरेत्तं ब्रूयादाहुत्यां म आहुतिः प्रत्यस्याद् यं नु त्वं पाप्मानं पश्यसि त्वामेव सोऽरिष्यतीत्येनं ब्रूयात् ॥५ ॥ तन्नु हैतदेके स्कन्नेऽग्निहोत्रे बिभ्यति; नो ह वै तदेवंविदाद्रियेतापि ह प्रायश्चित्तं कर्तुं नाद्रियेत; चतुर्गृहीतं तु हाभिगृह्णीयाद्धोमाय ॥६ ॥

## वाधूल-अन्वाख्यानम् ३.४. १-८ : [ पाशुकप्रायश्चित्तम् ]

अथातः प्रायश्चित्तीनामेव। स यदि पशुरुपाकृतः पलायेत का तत्र प्रायश्चित्तिः, कथं कुर्यादिति; विनष्टीर्जुहुयादित्याहुस्ता वा एता विनष्टयो हूयन्ते 'सूर्यं ते चक्षुर्गच्छतु स्वाहा,' 'सरस्वतीं ते वागगच्छतु स्वाहा' इति; तमनुपलाय्य गृह्णीयुरथैनमालभेत; यद्यु न गृह्णीयुरन्यमालभेत; सैव ततः प्रायश्चित्तिः ॥१ ॥ अथ यदि म्रियेत कथं कुर्यादिति; विनष्टीर्जुहुयादित्याहुस्ता वा एता विनष्टयो हूयन्ते 'सूर्यं ते चक्षुर्गच्छतु स्वाहा', 'सरस्वतीं ते वाग् गच्छतु स्वाहा' इति; विनष्टीर्हुत्वाऽन्यं संस्रावेणाभिघार्याथैनं शामूलं वा विहरेयुः पचेरन् वैनत् ॥२ ॥ तदाहुर्- यदन्यं न विन्देत् कथं कुर्यादिति; स्पृतीर्जुहुयादित्याहुस्ता वा एता स्पृतयो हूयन्ते 'सूर्यात्ते चक्षुः स्पृणोमि स्वाहा', 'सरस्वत्यास्ते वाचं स्पृणोमि स्वाहा' इति; स्पृतीर्हुत्वैनं संस्रावेणाभिघार्य तं यदत एव मृतमुदञ्चं कर्षेयुः, पशुकुणपेन हास्य शवेनेष्टं स्यान्मृतं वै शवं हरन्ति, य एवं तत्र ब्रूयात् पशुकुणपेन न्वा अयं शवेनायष्ट, क्षिप्रे न्वा इमं यजमानं मृतमुदञ्चं क्रक्ष्यन्तीति तथा हैव स्यात् ॥३ ॥ तमत्रैव पर्यग्निकुर्यात्, तस्य पर्यग्निकृतस्य वपामुत्खिद्य तया प्रचरेत्; अथैनमङ्गशः संकृत्योदञ्चं हरेयुर्वैश्वदेवानि वाऽङ्गानि समाप्तेनैवास्य पशुनेष्टं भवति; एवं नु हास्य पशुकुणपेन समेधेनैव पशुनेष्टं भवति ॥४ ॥ अथ यदि यजमान उपतापी स्यात् कथं कुर्यादिति; विनष्टीर्जुहुयादित्याहुस्ता वा एता विनष्टयो हूयन्ते 'सूर्यं ते चक्षुर्गच्छत्वसौ स्वाहा', 'सरस्वतीं ते वाग् गच्छत्वसौ स्वाहा' इति यजमानस्य नामग्राहम्; स यद्यपि नीत इव भवति जीवत्येव ॥५ ॥ अथ यद्यभिचरेत् कथं कुर्यादिति; स्पृतीर्जुहुयादित्याहुस्ता वा एता स्पृतयो हूयन्ते 'सूर्यात् ते चक्षुः स्पृणोम्यसौ स्वाहा' 'सरस्वत्यास्ते वाचं स्पृणोम्यसौ स्वाहा' इति यं द्विष्यात् तस्य नामग्राहम्; तमेतासु

1. Vādhūla-Anvākhyānam, critically edited by Prof. B.B. Chaubey, Katyayan Vaidik Sahitya Prakashan, Hoshiarpur, 2001.



देवतासु व्युत्क्रान्तासु यथा शुष्कं स्थाणुं स्तृण्वीतैवमेनं स्तृणुते, ता जगार्तिमार्च्छति ॥६ ॥ अथ यद्यष्टापदी स्यात् कथं कुर्यादिति; विनष्टीर्जुहुयादित्याहुस्ता वा एता विनष्टयो हूयन्ते 'सूर्यं ते चक्षुर्गच्छतु स्वाहा', 'सरस्वतीं ते वाग् गच्छतु स्वाहा' इति ; हुत्वा हुत्वैवैतं गर्भं संस्रावेणाभिघारयत्येताभ्यो वै देवताभ्यः पुरुषः पशुः संभवन् संभवति; याभ्य एव देवताभ्यः पुरुषः पशुः संभवन् संभवति ताभ्य एवैनं जुहोति ॥७ ॥ अथैतं गर्भं पशुश्रपणे जुहोत्यतिरिक्त एषोऽग्नीनां यत् पशुश्रपणोऽतिरिक्त एवातिरिक्तं दधात्यतिरिक्तस्य शान्त्यै; सैषा प्रायश्चित्तिः; न ह वै तत्र काचनार्तिर्भवति न रिष्टिर्यत्रैषा प्रायश्चित्तिः क्रियते ॥८ ॥

## [३. ५. १-९]

केशिग्रहपतिकानां ह सम्राड्दुहं शार्दूलो जघान; स ह ससत्रिण उवाच केशी; केह प्रायश्चित्तिरिति; तं होचुर्नास्ति प्रायश्चित्तिः; खण्डिकोऽयमौद्भारिः प्रायश्चित्तिं वेद, स तु तुभ्यमेतादृक् चैव कामयतेऽतश्च पापीय इति ॥१ ॥ स होवाच, संग्रहीतरानय मे, युङ्ग्धि रथम्; यद्यु ह मा मारयिष्यति यज्ञं विकृष्टमनु विक्रक्ष्य इति, यद्यु वै मे वक्ष्यति समाप्स्यामीति ॥२ ॥ स ह युक्त्वा ययावाजगाम; तं ह प्रतिख्यायोवाच यन्न्वेतान्येवाजिनानि मृगेषु भवन्त्यथैषां पृष्टीरपिशीर्य पचामहे, कृष्णाजिनं मे ग्रीवा ग्रीवास्वाबद्धमित्येवमेदमधृषोऽभ्यवस्यन्तू३मिति ॥३ ॥ नेति होवाच सम्राड्दुहं वै मे भगवः शार्दूलोऽवधीत्, यद्यु मा मारयिष्यसि यज्ञं विकृष्टमनु विक्रक्ष्य इति; यद्यु वै मे वक्ष्यसि समाप्स्यामीति ॥४ ॥ स होवाचामन्त्रणीयान्वा आमन्त्रया३ इति; तान् हामन्त्रयाञ्चक्रे; तान् होवाच यद्यु हास्मै वक्ष्याम्येतस्यैवेयं प्रजा भविष्यति न मम, लोकी त्वहं भविष्यामि; यद्यु वा अस्मै न वक्ष्यामि ममैवेयं प्रजा भविष्यति नामुष्य, लोकी त्वसौ भविष्यति नाहमिति; तं होचुर्मा वोचो भगवोऽयं वाव लोको राजन्यबन्धोरिति; नेति होवाचामूर्वै रात्रयो भूयसीरिति, तस्मा उ हैतामेव प्रायश्चित्तिमुवाच विनष्टीर्हुत्वाऽन्याः संस्रावेणाभिघार्य ताः सम्राड्दुहं कुरुष्वेति ॥५ ॥ स हैवञ्चकार; ताः पराभूता हैवाप्यद्य खण्डिकस्यौद्भारेः प्रजाः; अथेमाः केशिनीरेव; स यस्य ह सम्राड्दुहं शार्दूलो हन्यादन्येन वा मृत्युना म्रियेत विनष्टीर्हुत्वाऽन्याः संस्रावेणाभिघार्य ताः सम्राड्दुहं कुर्वीत; सैव ततः प्रायश्चित्तिः ॥६ ॥

## [४.७४.१-२]

इदं वा अन्वाहुः- सुवर्भानुरासुरः सूर्यं तमसाऽविध्यत; तस्मै देवाः प्रायश्चित्तिमैच्छन्निति ॥१ ॥ तस्य दाक्षिणैरेव माध्यन्दिने सवने तमः पाप्मानमपाघ्नन्; 'उदु त्यं जातवेदसम्' इत्येतयैवास्य प्रथमया तमः पाप्मानमपाघ्नन्, 'चित्रं देवानामुदगादनीकम्' इति द्वितीयया, 'अग्ने नय सुपथा राये अस्मान्' इति तृतीयया; तं विपाप्मानं कृत्वा 'दिवं गच्छ सुवः

पत' इति सुवर्गं लोकमगमयन्; तथो एवैतदेवंविदध्वर्युर्दाक्षिणैरेव माध्यन्दिने सवने यजमानस्य तमः पाप्मानमपहन्ति; 'उदु त्यं जातवेदसम्' इत्येतयैवास्य प्रथमया तमः पाप्मानमपहन्ति; 'चित्रं देवानामुदगादनीकम्' इति द्वितीयया, 'अग्ने नय सुपथा राये अस्मान्' इति तृतीयया विपाप्मानं कृत्वा 'दिवं गच्छ सुवः पत' इति सुवर्गं लोकं गमयति ॥२॥

APPENDIX–III

# परिशिष्ट - 3 : वाधूलयज्ञप्रायश्चित्तस्य बौधायनश्रौतसूत्रगताः समानान्तरपाठाः

*(Texts of the BaudhŚS corresponding to the Vādhūla-YajñaPrāścittam)*

| *VādhYpr* | | *BaudhŚS* |
|---|---|---|
| I. 1.4 | = | 14.24—अथ वै भवति पराची वा एतस्मै व्युच्छन्ती व्युच्छति यस्याग्निमनुद्धृतꣳ सूर्योऽभ्युदेति। 'उषाः केतुना जुषतां यज्ञं देवेभिरन्वितम्। देवेभ्यो मधुमत्तमꣳ स्वाहा' इति प्रत्यङ् निषद्याज्येन जुहुयात् प्रतीचीमेवास्मै विवासयतीति ब्राह्मणम्। |
| I.1.6 | = | 29.10:6-8—यस्याहिताग्नेरग्निरपक्षायति यावच्छम्यया प्रविध्येद्यदि तावदपक्षायेत्तं संभरेत् 'इदं त एकं पर उत एकम्' इति। |
| I.1.7 | = | 29.10:21—यस्य व्रत्येऽहन् पत्न्यनालम्भुका भवति तामपरुध्य यजेतेति। तामपरुध्यैव यजेत सर्वेणैव यज्ञेन यजते। तामिष्ट्वोपह्वयेत 'अमूहमस्मि' इत्युतुकाल उपगमनमन्त्रः। |
| I.1.8 | = | 29.10:23—अग्न्यन्वाधानप्रभृत्यपरुध्यैव यजेत तथैकाहानाम्। |
| I.2.1 | = | 27.2:1-3—यदि पुरा प्रयाजेभ्यो बहिःपरिधिरङ्गारा अभिपर्यावर्तेरन् ब्राह्मणोक्तं प्रायश्चित्तं कृत्वा 'इमं जीवेभ्यः परिधिं दधामि' इत्येतया स्रुवाहुतिं जुहुयात्। |
| I.2.3 | = | 27.10:8-9 — अथ यदि मथ्यमानो न जायेत यत्रान्यं पश्येत् तत आहृत्य होतव्यमिति। |
| I.3.2 | = | 14.29 : 14-17 — अथ वै भवति यस्याक्रीतꣳ सोममपहरेयुः क्रीणीयादेव। सैव ततः प्रायश्चित्तिरिति ब्राह्मणम्। अथ वै भवति यस्य क्रीतमपहरेयुरादाराꣳश्च फाल्गुनानि चाभिषुणुयादिति। |
| I.4.1 | = | 27.9:1-6 — अथ हविर्दोषान् व्याख्यास्यामः। यथैतन्नीलमक्षिका मत्कुणश्चैलशिरसोर्यूके कीटो वा पिण्डकारी स्यात्क्षुद्रकीटमक्षिकापिपीलिकावर्जꣳ श्वमार्जारनकुलकुक्कुटमर्कट-ध्वांक्षाखुपुरीषसिक्पदकेशमृतनखकुनख पूतिद्रप्सस्वेदासृक्स्नेहाश्रुका-सक्षवथ्वार्द्रव्रणैर्वोपहतमन्यैर्वोपहतꣳ रजस्वलया वा स्पृष्टं तथाऽप्रयतेन भ्रूणघ्नेन वा दृष्टं तथाऽपपात्रेणामेध्ये वा देशे। |

I.4.2 = 27.9:6-7—स्कन्नं दुष्टꣳ हविरपोऽभ्यवहरन्ति।

I.4.3 = 27.9:7—शीते भस्मनि वा निधापयति। मिन्दाहुती हुत्वाऽथान्यं निर्वपेदाज्येन वा प्रचरेत्।

I.4.4 = 27.9:8-9—अपि तु खलु क्षिप्रसꣳस्कारमाज्यं ब्रुवत इति।

I.5.2. = 27.13:9.12—सर्वाणि चेद्धवीꣳषि दुष्येयुरपहरेयुर्वाऽऽज्येनैता देवताः प्रतिसंख्यायमिष्ट्वैतामिष्टिमन्यामिष्टिमनुल्बणां तन्वीत। यज्ञो हि यज्ञस्य प्रायश्चित्तिरिति विज्ञायते।

I.6.1 = 27.1:1—अथातो मन्त्रगणाम्नातानि प्रायश्चित्तानि व्याख्यास्यामः।

I.6.2 = 27.1:2 — सर्वत्रोपरिष्टान्मन्त्रकृतम्।

I.6.3-4 = 27.1:2—यद्यधस्तान्निपतेत् 'ब्रह्म प्रतिष्ठा मनसः' इत्येतया प्रतिष्ठाप्यैतयैव स्रुवाहुतिं जुहुयात्। हुत्वा वा प्रतिष्ठापयेत्।

I.6.5 = 27.1:4—हुत्वाऽनन्तरं कर्म कुर्यात्। एवमन्येष्वपि।

I.6.6 = 27.1:4-5—अतिक्रान्तं कर्म नाद्रियेत यद्यर्थलुप्तं भवति।

I.6.7 = 27.1:5-7—सर्वत्राश्रावितप्रत्याश्रावितवषट्काराणामत्युक्तानुक्तहीनेषु 'आश्रावितमत्याश्रावितम्' इत्येतया स्रुवाहुतिं जुहुयात्।

I.6.8 = 27.1:7-9—सर्वत्र देवोच्चारणेषु भागिनीं देवतामनुच्चारयित्वा योऽन्यामुच्चारयेत् 'यद्वो देवा अतिपादयानि' इत्येतया स्रुवाहुतिं जुहुयात्।

I.6.9 = 27.1:9-10—सर्वत्र देवताऽऽवाहनेषु भागिनीं देवतामनावाहयित्वा योऽन्यामावाहयेदेतयैव स्रुवाहुतिं जुहुयात्।

I.6.10 = 27.1:10-11—यत्र स्मरेत्तदुपोत्थायैनां मनसाऽऽवाहयेदथातिरिक्तमाज्येन यथोढां यजेत।

I.6.11 = 27.1:11-15—सर्वत्र प्रणीतानां प्रणीयमानानां प्रणीतानां वा यदि विप्रुषो विपतेयुः स्रवेद्वा चमसे 'आपो हि ष्ठा मयोभुवः' इति तिसृभिरद्भिः पूरयित्वा 'ततं म आपस्तदु तायते पुनः' इत्येतया स्रुवाहुतिं जुहुयात्।

I.6.12 = 27.1:15-19—सर्वत्र वितते यज्ञकर्मणि यदि सूर्यो नाविर्भवत्यन्यत्रादेशात् 'उद्वयं तमसस्परि', 'उदु त्यं', 'चित्रम्' इत्येताभिः स्रुवाहुतीर्जुहुयात्।



I.6.13 = 27.1:17— यदि सूर्याचन्द्रमसोर्ग्रहणं विद्यत एतदेव।

I.6.14 = 27.1:18-19—अथ यदि यजमानस्यर्त्विजां वा स्वप्ने रेतोविसर्गः स्यात् 'इमं मे वरुण', 'तत्त्वा यामि' इत्येताभ्याꣳ स्रुवाहुती जुहुयात्।

I.6.15 = 27.1:19-22—सर्वत्र हविर्देवतायाज्यापुरोनुवाक्याहुतीनाꣳ हुताहुतभ्रेषेष्वन्तरिते विपर्यासे च 'त्वं नो अग्ने', 'स त्वं नो अग्ने' इत्येताभ्याꣳ स्रुवाहुती जुहुयात्।

I.6.16 = 27.1:25-2:1-3—सर्वत्र वितते यज्ञकर्मणि यदि पुरा प्रयाजेभ्यो बहिः परिध्यङ्गारा अभिपर्यावर्तेरन् ब्राह्मणोक्तं प्रायश्चितं कृत्वा 'इमं जीवेभ्यः परिधिं दधामि' इत्येतया स्रुवाहुतिं जुहुयात्।

I .6.17-7.1 = 27.2:3–5 — सर्वत्र वितते यज्ञकर्मणि यदि यज्ञभ्रेष आगच्छेत् 'इष्टेभ्यः स्वाहा', 'वषडनिष्टेभ्यः स्वाहा', इत्येतैरष्टाभिः स्रुवाहुतीर्जहुयात्।

I .7.2 = 27.2:5-7 — सर्वत्र वितते यज्ञकर्मणि यदि जन्यं भयमागच्छेत् 'यत इन्द्र भयामहे', 'स्वस्तिदा विशस्पतिः' इत्येताभ्याꣳ स्रुवाहुती जुहुयादभये वा पुनर्यजेत।

I.7.3 = 27.2:7-9 — सर्वत्रोपाꣳशुप्रभृति वाच स्थानानाꣳ स्वराक्षरपदवृत्तभ्रेषेषु 'आभिर्गीर्भिर्यदतो न ऊनम्' इत्येतया स्रुवाहुतिं जुहुयात्।

I.7.4 = 27.2:9-10—सर्वत्रानाज्ञातप्रायश्चित्तेषु 'अनाज्ञातं', 'पुरुषसंमितः' इत्येताभ्याꣳ स्रुवाहुती जुहुयात्।

I.7.5 = 27.2:10-12—सवत्रेध्माबर्हिषः प्रयाजानुयाजानां पाकत्राकर्मसु 'यत्पाकत्रा मनसा' इत्येतया स्रुवाहुतिं जहुयात्।

I.7.6 = 27. 2: 12–14 — सर्वत्र स्कन्ने भिन्ने छिन्ने भग्ने नष्टे क्षामे विपर्यास उद्दाह ऊनातिरिक्ते वा 'यन्म आत्मनो मिन्दाभूत्' 'पुनरग्निश्चक्षुरदात्' इत्येताभ्याꣳ स्रुवाहुती जुहुयात्।

I.7.7 = 27.2:14.15—सर्वेष्वग्न्युपघातेषु 'पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धताम्' इत्येतया समिधमादध्यादेतयैव स्रुवाहुतिं जुहुयात्।

I.7.8 = 27.2:16–17—सर्वेषु यज्ञक्रतुषु पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य ध्रुवातः सर्वप्रायाश्चित्तानि जुहोति 'ब्रह्म प्रतिष्ठा मनसः' इत्येतेनानुवाकेन प्रत्यृचम्।'

I.7.9 = 27.2:18-21— अथ वै भवति समष्टियजूꣳषि जुहोति यज्ञस्य समिष्ट्यै। यद्वै यज्ञस्य क्रूरं यद्विलिष्टं यदत्येति यन्नात्येति यदतिकरोति यन्नापि करोति तदेव तैः प्रीणातीति ब्राह्मणम्।

I.7.10 = 27.2.21-22 — एतान्येव ब्राह्मणविधिविहितान्याप्यायनानि मन्त्रवन्ति भवन्तीति बौधायनः।

I.7.11 = 27. 2 : 22-23 — मन्त्रगणाम्नातानि नैमित्तिकानीति शालीकिः।

I.8.1 = 27.3:3-5—कपालानामनभिप्रथने व्याहृतीभिराहवनीये स्रुवाहुती-र्जुहुयात् 'भूर्भुवः सुवः' इति। एतावदेव नानाप्रथने चातिप्रथने च।

I.8.2 = 27.3:5-14—अथ हविषामशृतद्रवदाहोत्सेकनिस्रावे प्रायश्चित्तिः। अशृते 'रुद्राय स्वाहा' इत्याहवनीये स्रुवाहुतिं जुहुयाद्, द्रवे वायवे विदग्धे निर्ऋत्यै। यदि दग्धꣳ स्याद् यदत्र शृतꣳ स्यात्तेन प्रचरेद्, अथ यदि सर्वमेव दग्धꣳ स्यादपोऽभ्यवहृत्य मिन्दाहुती जुहुयात्। अथान्यं निर्वपेदाज्येन वा प्रचरेत्। सैव ततः प्रायश्चित्तिः। यस्यैयस्यै दिश्युत्सिच्येत तस्यैतस्यै देवतायै स्रुवाहुतिं जुहुयाद् यदि प्रागग्नये, यदि दक्षिणतो यमाय, यदि पश्चाद्वरुणाय, यद्युत्तरतः सोमाय। अथ यदि सर्वत एवोत्सिच्येतैताभ्यः सर्वाभ्यो देवताभ्यः स्रुवाहुतीर्जुहुयात्। तमाज्येनाप्यायनीभ्यामाप्याययति 'आप्यायस्व', 'सं ते' इति।

I.8.3 = 27.3:14-18—अथ हविषामुद्वासनकाले पतनफालनखण्डनोद्वर्तनसꣳ-सर्पणविपरीतव्यवायकरणेषु व्याहृतीभिराहवनीये स्रुवाहुतीर्जुहुयात् 'भूर्भुवः सुवः' इति। अथान्तरेण वेद्युत्करावुदङ्ङुपनिष्क्रम्या तमितोरुदङ्ङुपनिःसृप्य व्याहृतीरुक्त्वा व्याहृतीभिरेव प्रतिपद्यते।

I.9.1 = 27.4:3-4— मन्त्रोनं वाऽतिरिक्तं वा दुरिष्टं वापि यद्भवेत्।
व्यपोहन्ति पाप्मानं तस्माद् व्याहृतयः स्मृताः ॥ इति ॥

I.9.2 = 27.4:8-9— उद्धृते तु पुरोडाशे वेपिते स्यन्दिते तथा।
भिन्ने सꣳसर्पणे चापि प्रायश्चित्तं कथं भवेत् ॥ इति ॥

I.9.3 = 27.4:10-12— विज्ञायते
उद्धृते तु कुलꣳ हन्याद्वेपिते नश्यति प्रजा।
भिन्ने सꣳसर्पणे चापि यजमानः प्रमीयते ॥ इति ॥

I.9.4 = 27.4:13-16—अथ पतनफालनखण्डनोद्वर्तनसꣳसर्पणेषु प्रसिद्धमुद्वास्य बर्हिषदं कृत्वा प्रभूतेन सर्पिषाऽवसिच्याभिमन्त्रयते 'किमुत्पतसि



किमुत्प्रोष्ठाः शान्तः शान्तेरिहागहि। अघोरो यज्ञियो भूत्वाऽऽसीद सदनꣳ स्वामासीद सदनꣳ स्वम्' इति।

I.9.5 = 27.4:16-18—ब्रह्मणे वरं दत्वाऽन्तर्वेद्यासादयेत्। तस्याꣳ सꣳस्थितायाꣳ सुरभिमतीं निर्वपेत्। तस्याꣳ सꣳस्थितायां तन्तुमतीं निर्वपेत्।

I.9.7 = 27.4:21-22— स्कन्ने ग्रहणनिर्वापे द्रव्याणां चानुमन्त्रणे।
यस्मिन्काले विजानीयात्तत्कुर्यात् कर्मसꣳस्तरे ॥

I.9.8 = 27.4:23-25— प्रणवो व्याहृतयश्चैव यज्ञ एष परोऽवरः।
तस्माद्यज्ञस्य यत्स्कन्नं विपरीतं च यद् भवेत्।
तत्सर्वं व्याहृतीभिः कुर्यादन्यत्र च वषट्कृतात् ॥

I.9.9 = 27.4:26-27— अजानद्भिः कृतं यच्च त्वरमाणैश्च यत्कृतम्।
व्याहृतीनां प्रयोगेण यत्कृतं कृतमेव तद् ॥ इति

I.9.10 ` = 27.4 : 28-30 — कपालानां प्रमाणानि ब्रूयादाध्वर्यवे विधौ।
समानि चतुरश्राणि द्व्यङ्गुलानि समन्ततः ॥
हविर्विकाराणां प्रमाणेन समविषमाणि वर्धयन्तीति बौधायनः ॥

I.10.1-2 = 27.7 : 1-7 — अथ यद्यरणी जीर्णे स्यातां जन्तुभिर्मन्थनेन वा। समाने नवे अन्ये अरणी आहृत्यामावास्यायामुपोष्य श्वोभूते दार्शेनेष्ट्वा तस्मिञ्जीर्णे शकलीकृत्य गार्हपत्ये प्रक्षिप्य प्रज्वाल्य दक्षिणेनोत्तरारणिमादाय सव्येनाधरारणिमुपर्यग्नौ धारयन् जपति 'उद्बुध्यस्वाग्ने प्रविशस्व योनिमन्यां देवयज्यां वोढवे जातवेदः। अरण्या अरणिमनुसंक्रमस्व जीर्णां तनुमजीर्णया निर्णुदस्व' इति।

I.10.3-4 = 27.7:7-12 — 'अयं ते योनिर्ऋत्वियः' इत्यरण्योरग्नीन् समारोह्य मन्थनस्यावृता गार्हपत्यं मथित्वा विहारं कल्पयित्वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाऽऽहवनीये संतनीं जुहोति 'मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु। या इष्टा उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन स्वाहा' इति।

I.10.5 = 27.7:12-13—अथाग्नये तन्तुमते पुरोडाशमष्टाकपालं निर्वपति। शरावं दक्षिणां ददाति। सा प्रसिद्धेष्टिः संतिष्ठते।

I.11.1 = 27.10:I—अथातोऽग्नीनामुद्वातानां प्रायश्चित्तिः।

1.11.2 = 27.10:4-7—अथ यदि सर्व एवोद्वायेयुरायतनेभ्योऽरण्योरग्नीन् समारोह्य मन्थनस्यावृता गार्हपत्यं मन्थति 'इतः प्रथमं जज्ञे अग्निः स्वाद्योनेरधि जातवेदाः। स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्' इति।

= 27.10:10-11—अथैनमुपतिष्ठते 'इषे रय्यै रमस्व सहसे द्युम्नायोर्जेऽपत्याय' इति।

= 27.10:11-13— अथैनमुपसमिन्धे 'सारस्वतौ त्वोत्सौ समिन्धाताम्', 'सम्राडसि विराडसि' इति।

= 27.10:13-16—अथैनमुपसमाधायान्वाहार्यपचनमाहृत्य ज्वलन्तमाहवनीयमुद्धृत्य न्युप्योपसमाधाय गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा दशहोतारं मनसाऽनुद्रुत्याहवनीये जुहोत्यन्वारब्धे यजमाने 'स्वाहा' इति। अथ प्रदक्षिणमावृत्य प्रत्यङ्ङद्रुत्य गार्हपत्ये दशात्मकं 'ब्राह्मण एकहोता' एत्येतस्यानुवाकस्य दश स्रुवाहुतीः। अथ यद्यन्वाहार्यपचन उद्वायेद् गार्हपत्यादेनमुद्धृत्यान्वाहार्यपचने चतुर्होतारं जुहोति गार्हपत्ये दशात्मकम्।

I.11.3 = 27.10:20-21—अथ यद्याहवनीय उद्वायेद् गार्हपत्यादेनमुद्धृत्याहवनीये पञ्चहोतारं जुहोति गार्हपत्ये दशात्मकम्।

I.11.4 = 27.10:21-23 — अथ यदि सवनगतानामग्नीनामाग्नीध्रीय उद्वायेच्छालामुखीयादेनमुद्धृत्याग्नीध्रीये षड्ढोतारं जुहोति शालामुखीये दशात्मकम्।

I.11.5 = 27.10:23-25—अथ यद्यौत्तरवेदिक आहवनीय उद्वायेदाग्नीध्रीयादेनमुद्धृत्यौत्तरवेदिक आहवनीये सप्तहोतारं जुहोत्याग्नीध्रीये दशात्मकम्।

I.11.6 = 27.11:1-5—'एतयैवावृतैकस्मिन्नुद्वाते द्वयोर्वा प्रतिविभज्य होतॄञ्जुहुयाद्, व्याहृतीश्चेद् व्यस्ताः समस्ताश्च जुहुयात्, तथा मिन्दाहुती जुहुयात्। मनस्वतीं चेदाहवनीये जुहुयात्। सैषाऽजस्राणामन्वाहितानाꣳ सवनगतानां चाग्नीनां प्रायश्चित्तिः।

I.12.1-2 = 27.13:1-2—अथ सान्नाय्यदुहो धयेयुश्चेद् वत्सा वायव्यया यवाग्वा सायं यजेत।

I.12.3 = 27.13 : 2-3—अप्येकस्यां दुग्धायां न धीतां दोहयेत्। दुग्धाभिः सꣳस्थाप्यादुग्धानां वत्सानपाकृत्य श्वः सान्नाय्येन यजेत।

I.12.4 = 27.13:4-5—सायं दोहश्चेदार्तिमार्च्छेदिन्द्राय व्रीहीन्निरुप्योपवसेदिति यथासमाम्नातम्।



I.12.5 = 27.13 : 5-6 — अपि वा प्रातर्दोहं द्वैधं कृत्वाऽन्यतरादातच्य सायंदोहस्थाने कुर्याच्छृतस्थान इतरत्।

I.12.6 = 27.13 : 6-8 — प्रातर्दोहश्चेदार्तिमार्च्छेदैन्द्रं वा माहेन्द्रं वा पुरोडाशं निरुप्य तेन दध्ना सह प्रचरेत्। उभयं चेदार्तिमार्च्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेदिति। प्रसिद्धमाग्नेयेन प्रचर्यैन्द्रेण प्रचरेत्।

I.12.8 = 28.11 : 1-2 — मन्त्रहीनेऽतिरिक्ते वा दुरधीते दुरागते।
अनागतेऽवषट्कारे अतीते वापि यद्धुते॥

I.12.9 = 28.11 : 3-4 — हविषः स्यन्दनादग्नेर्होतुर्हीनस्वरेण च।
अतिदाहे च हविषां यत्किंचित्पात्रभेदने॥

I.12.10 = 28.11 : 5-6 — कपालनाशे भेदे च चतुष्पाद्यन्तरागते।
प्रणाशे च पवित्रस्य आज्यस्यैवावलोडने॥

I.12.11 = 28.11 : 7-8 — हविषां च विपर्यास ऋत्विक्ष्वप्रयतेषु च।
यज्ञ प्रसारणीकाले द्वैधीभावे समुत्थिते॥

I.12.12 = 28.11 : 9.10 — मिन्दाहुती च होतव्ये व्याहृत्यः प्रणवादिकाः।
वारुण्यस्तन्तुमत्यश्चान्वग्निश्च मनस्वती॥

I.12.13 = 28.11 : 11-12—महाव्याहृतयः सप्त प्राजापत्या तथैव च।
प्रसंधानाय यज्ञस्य त्वेते मन्त्राः प्रकीर्तिताः॥

I.12.14 = 28.11 : 13-14—अप्रायश्चित्तिको यज्ञो ह्यसुरैः संप्रभुज्यते।
असुरैर्भुक्तयज्ञस्तु देवान् दोषेण सꣳश्रयेत्॥

I.12.15 = 28.11 : 15.16—ऋत्विजो यजमानं च आयुषो ब्रह्मवर्चसात्।
प्रच्यावयेद्दुरिष्टं तत्तस्माद्दोषान्प्रणाशयेद्॥ इति॥

I.14.1 = 28.12 : 1 — अथातोऽनुग्रहान् व्याख्यास्यामः।

I.14.1.क = 28.12.1-2 —सायꣳ होमं चोपोदयं जुहुयात्प्रातर्होमं चोपास्तमयं कालेन कालमनतिक्रम्य।

I.14.2 = 28.12 : 3-4 — कालो दर्शपूर्णमासयोरग्निहोत्रस्य न स्कन्दते न व्यथत इति विज्ञायते।

I.14.3 = 28.12 : 4-8 — आ प्रातराहुतिकालात्सायमाहुतिकालो नातीयादा सायमाहुतिकालात्प्रातराहुतिकालः। अथ यदि सायꣳ 'सायं दोषा

वस्तोर्नमः स्वाहा' इत्याहुतिं हुत्वाऽग्निहोत्रं जुहुयात्। यदि प्रातः 'प्रातर्दोषा वस्तोर्नमः स्वाहा' इत्याहुतिं हुत्वाऽग्निहोत्रं जुहुयात्।

I.14.4 = 28.12 : 8-10 — अथ यदि पूर्वस्यामाहुत्यां हुतायामाहवनीयोऽनुगच्छेद् 'अग्निर्दारौ दारावग्निः' इति वदञ्छकले हिरण्यं निधायोत्तरामाहुतिं जुहुयात्।

I.14.5 = 28.12 : 10 — कालातिक्रमेष्वापद्धोमः। आमावास्यस्य कालात्पौर्णमासस्य कालो नातीयादा पौर्णमासादामावास्यस्य। आ व्रीह्याग्रयणस्य कालाच्छ्यामाकाग्रयणस्य कालो नातीयादा यवाग्रयणस्य कालाद् व्रीह्याग्रयणस्या श्यामाकाग्रयणाद् यवाग्रयणस्य। आ वरुणप्रघासानां कालाद् वैश्वदेवस्य कालो नातीयादा साकमेधेभ्यो वरुणप्रघासानामा शुनासीर्यात्साकमेधानामा वैश्वदेवाच्छुनासीर्यस्य। आ दक्षिणायनपशोः कालादुत्तरायणपशोः कालो नातीयादोत्तरायणपशोर्दक्षिणायनपशोः। ओत्तरवसन्तज्योतिष्टोमस्य कालात्पूर्ववसन्तज्योतिष्टोमस्य कालो नातीयात्। समस्तस्य संवत्सरस्या निज्यासुत्या।

I.14.6 = 28.12 : 20-22 — ऋषयो ह स्म तत्प्रयोयुगा आसन्। तेऽर्धमासायार्धमासायाग्निहोत्रमजुहवुः। प्रतिपदि सायं चतुर्दशगृहीतानि गृह्णाति। सकृदुन्नयते हविः। एका समित्। सकृद्धोमः सकृदुपस्थानम्। सकृत्पाणिनिमार्जनम्।

I.14.7 = 28.12 : 23-27 — एवं प्रातः। अथ षण्मासानहुतेऽग्निहोत्रे दर्शपूर्णमासाभ्यामनिष्ट्वाऽऽग्रयणैश्चातुर्मास्यैः पशुबन्धेन चाग्नये पथिकृते अग्नये तन्तुमतेऽग्नये वैश्वानरायाग्नये व्रतपतय इति पुरोडाशान्निरुप्याग्निहोत्रं हुत्वा दर्शपूर्णमासाभ्यामिष्ट्वाऽऽग्रयणैश्चातुर्मास्यैः पशुबन्धेन च।

I.14.8 = 28.12 : 27-32 — अथ संवत्सरमहुतेऽग्निहोत्रे दर्शपूर्णमासाभ्यामनिष्ट्वाऽऽग्रयणैश्चातुर्मास्यैः पशुबन्धेन चाग्नये पवमानायाग्नये पावकायाग्नये शुचयेऽग्नये पथिकृतेऽग्नये तन्तुमतेऽग्नये वैश्वानरायाग्नये व्रतपतये इति पुरोडाशान्निरुप्याग्निहोत्रं हुत्वा दर्शपूर्णमासाभ्यामिष्ट्वाऽऽग्रयणैश्चातुर्मास्यैः पशुबन्धेन च।

I.14.9 = 29.6 : 15-16 — अथ यद्यासन्दी शिक्यमगारं वा दह्येत वैश्वानरीभिः समिधोऽभ्यादध्यात् 'वैश्वानरो न ऊत्या' इत्येतेनाष्टार्चेन।



I.14.10 = 29.6 : 15-24 — अथ यदि वसतीवरीकलशः पान्नेजन एकधनाः कुम्भेष्टकाः क्वथनेष्टका वा परासिच्येरन् यूपो वा भिद्येत रशना वा छिद्येत चषालं वा भिद्येतौदुम्बरी वा भिद्येत ग्रावा वा भिद्येत द्रोणकलशो वा दीर्येतान्यद्वा यज्ञे दारुमयं मृन्मयं वा पात्रं भिद्येत तत् स्वेनैव यजुषा स्व आयतने निधायोपधायाभिमन्त्रयते 'भूरायुर्मे धारयत प्राणं मे धारयत प्रजां मे धारयत पशून्मे धारयत मा म आयुः प्राणः प्रजाः पशवः परासिच्येरन्' इति।

I.15.1 = 29.5 : 1-5 — अथ यदि हुताहुतौ सोमौ संसृज्येयातामाहवनीयादुदीचोऽङ्गारान्निरुह्य तेषु जुहुयात् 'यज्ञस्य हि स्थ ऋत्वियाविन्द्राग्नी चेतनस्य च। हुताहुतस्य तृप्यतमहुतस्य हुतस्य च॥ हुतस्य चाहुतस्य चाहुतस्य हुतस्य च। इन्द्राग्नी अस्य सोमस्य वीतं पिबतं जुषेतां स्वाहा' इति।

I.15.2 = 29.5 : 5-7 — तस्य नित्यभक्षमनुवर्तयति 'मा यजमानं तमो विदन्मर्त्विजो मो इमाः प्रजाः। मा यः सोममिमं पिबात् संसृष्टमुभयं कृतम्' इति।

I.15.3 = 29.5 : 7-9 — अथ यद्यन्यहुताश्चसमा अन्यहुतैः संसृज्येरन् सोमे वा सोममभिगृह्णीयादित्येतदेव।

I.15.4 = 29.5 : 9-10 — अथ यद्यन्यवृता ऋत्विजोऽन्यवृतैः संसृज्येरन् दीक्षिता दीक्षितैर्वाऽन्यत्र व्रात्यस्तोमात् सत्राच्वेत्येतदेव।

I.15.5 = 29.5 : 10-14 — अथ यदि सुतः सोमोऽभिवृष्येत 'तदित्पदं', 'प्रत्यस्मै पिपीषते' इत्येताभ्यां स्रुवाहुती हुत्वा तस्य नित्यभक्षमनुवर्तयति 'इन्दुरिन्द्रमवागादिन्दोरिन्द्रोऽपात्। तस्य त इन्दविन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि' इति।

I.15.6 = 29.5 : 14-20 — अथ यदि सुते सोमे यजमानो म्रियेत भयं वाऽऽगच्छेत् सर्वाणि हवींषि पात्र्यां समवधाय द्रोणकलशे सोमं जुह्वामाज्यं पशुमन्यस्यामित्येकामाहुतिं जुहुयात् 'ये देवा येषामिदं भागधेयं बभूव येषां प्रयाजा उतानूयाजाः। इन्द्रज्येष्ठेभ्यो वरुणराजभ्योऽग्निहोतृभ्यो देवेभ्यः स्वाहा' इति हुत्वाऽत ऊर्ध्वं पैतृमेधिकं कर्म प्रतिपद्येताभये वा पुनर्यजेत।

I.15.7 = 29.5 : 21 — आत्मनि समारूढेष्वग्निषु न खादेन्न पिबेन्नोपरि शय्यां शयीत नाप्सु निमज्जेन्न मैथुनं व्रजेत्। कामं खादेत् कामं पिबेत् कामं त्वेवोपरि शय्यां शयीत नैवाप्सु निमज्जेन्न मैथुनं व्रजेदिति।

I.15.8-16.1= 28.9:3-5 — कृष्णाजिनाद् व्यवच्छिन्नो दण्डाद् वा 'देवाञ्जनमगन् यज्ञस्ततो मा यज्ञस्याशीरवतु। वर्धतां भूतिर्दध्ना घृतेन मुञ्चतु यज्ञो यज्ञपतिमꣳहसः' इति जपेत्।

I.16.2 = 28.9 : 9-11 — छर्दयित्वा निष्ठीव्य वा जपति 'यदत्रापि रसस्य मे निरष्ठविषमस्तृतः। अग्निष्टत्सोमः पृथिवी पुनरात्मन्दधातु मे' इति।

I.16.3 = 28.9 : 21-23 — स्वप्नेऽन्नं भुक्त्वा जपति 'यदन्नमद्यते नक्तं न तत् प्रातः क्षुधोऽवति। सर्वं तदस्मान्मा हिꣳसीन्न हि तद्दृशे दिवा' इति।

I.16.4 = 29.9 : 20-21 — दुःष्वप्नं दृष्ट्वा जपति 'अभिपर्यावर्तते दुःस्वप्न पापस्वप्नादभूत्यै। ब्रह्माहमन्तरं करवै न हि स्वप्नमुपग्रथः' इति।

I.16.5 = 28.9 : 23-24 — लोहितमुत्पतितं दृष्ट्वा कण्डूय वा जपति 'नमो रुद्रियाभ्योऽद्भ्यः स्वाहा' इति।

I.16.6 = 28.9 : 25-26 — नान्येन दीक्षितेन समेयात्। यदि समेयात् 'कया नश्चित्र आभुवत्' इत्येतामृचं जपेत्।

I.16.7 = 28.9 : 26-28 — देवयजनादन्यत्राभ्युदितोऽभिनिम्रुक्तो वा 'सूर्यो मा देवो देवेभ्यः पातु' इति जपेत्।

I.16.8 = 29.3 : 1-3 — अथ वितते यज्ञकर्मणि प्रायश्चित्तानि व्याख्यास्यामः। तत्रौषधं पयः पशुः सोम आज्यमित्येतेषु न्यूनेषु वा नष्टेषु वाऽपहतेषु वा पुनरुत्पाद्य गृह्णीयात्।

I.16.9 = 29.3 : 3-5 — यत्र स्मरेत् प्राक् स्विष्टकृत उत्पादनं भवति। स्विष्टकृत ऊर्ध्वं स्मरेत् तत्सꣳस्थाप्यैतेनैव पुनर्यजेत् सह यजेद्वा।

I.16.10 = 29.3 : 5-10 — अथ यदि निरुप्य स्मरेदन्यं दैवतम् 'अमुष्मै त्वा' इति प्रतिविभज्याभिमृश्य सर्वं जुहुयात् 'अमुष्मै स्वाहा' इति, यत्र स्मरेत् तत्रैवमेव कुर्यादासादनात्। अथ यद्यासाद्य स्मरेदन्वायात्य स्थानेषु जुहुयादन्यद्वा पूर्वोक्तं प्रायश्चित्तं कुर्यादन्यासु देवतास्विष्टासु नष्टेषु दुष्टेषु वा दोषवति वा तन्त्रे प्रधानमावर्तयेत् सर्वेष्टिरशेषतः।

I.16.11 = 29.3 : 10-12 — तस्य कः कर्मण उपक्रमो भवतीति। भागिनो दैवतस्य शूर्पादानप्रभृति कर्म कृत्वा श्रपयित्वाऽऽसाद्य स्वस्थाने प्रचरेत्। तत्र प्रायश्चित्तं मिन्दाहुती जुहुयाद् व्याहृतीश्च।

I.16.12 = 29.3 : 12-13 — एवं पशावुपाकरणप्रभृत्या स्विष्टकृतः पूर्वोक्तं प्रायश्चित्तं कुर्यात्।

I.17.1 = 29.3 : 13-15 — अथ यदि प्रातरनुवाकमनुपाकृतमादित्योऽभ्युदियात् कथं तत्र प्रायश्चित्तं भवतीति। 'उषाः केतुना जुषतां यज्ञं देवेभिरन्वितम्। देवेभ्यो मधुमत्तमꣳ स्वाहा' इति मिन्दाहुती व्याहृतीश्च हुत्वोपाकुर्यात्।



I.17.2 = 29.3 : 16-18 — अथ यदि प्रातरनुवाके शस्यमान आदित्योऽभ्युदियात् 'उद्वयं तमसस्परि', 'उदु त्यं', 'चित्रम्' इत्येताभिः स्रुवाहुतीर्जुहुयात्।

I.17.3 = 29.4 : 1-3 — अथ यदि ग्रहान् ग्रहीष्यमाणो भागिनीं देवतामगृहीत्वा योऽन्यां गृह्णीयात् तथा 'अमुष्मै स्वाहा' इति तदानीमेव सर्वं जुहुयात्। भागिनीं पुनर्गृहीत्वा मिन्दाहुती जुहुयात्।

I.17.4 = 29.4 : 5-7— होत्रकाणां ग्रहेषु वा चमसेषु वा हविर्दोषोक्तदोषो भवेत्। तथाऽऽपोऽभ्यवहृत्य तत्प्रायश्चित्तꣳ हुत्वा तथा पुनर्गृहीत्वा जुहुयाच्चमसेषु पुनरुन्नीय जुहुयात्।

I.17.5 = 29.4 : 7-8— हुत्वा वा तस्मिन् हिरण्यमन्तर्धायाप आनीय भक्षयेत्। सैव ततः प्रायश्चित्तिः।

I.17.6 = 29.4 : 8-1— अथ यदि सवनकालोऽतिक्रामेत् 'अग्निर्मूधा दिवः' इत्येतस्यानुवाकस्य प्रथमेन गायत्रेण जुहुयात् प्रातःसवने। तथा त्रैष्टुभेन माध्यन्दिने सवने। तथा जागतेन तृतीयसवने।

I.17.7 = 29.4 : 11-15 — अत ऊर्ध्वमतिरात्र उत्तरमहर्नाधिगच्छेत्। यदि गच्छेद् यज्ञभ्रेष आगच्छेत्। तत्र प्रायश्चित्तꣳ सर्वान् होतॄन् जुहुयात्। विज्ञायते ब्रह्म वै चतुर्होतार इति। तस्माच्चतुर्होतृनेव जुहुयादत ऊर्ध्वमहः संख्यां नाधिगच्छेदेकाहेषु।

I.17.8 = 29.4 : 15-19 — अथ सवनीयानां प्रायश्चित्तिः। अथ यदि पूतिगन्धः स्यात्तदुत्सृज्य पुनरुत्पाद्य प्रचरेत्। अपि वोष्णोदकेन प्रक्षाल्याज्येऽवधाय पुनः श्रपयित्वा प्रचरेत्। तत्रापि यदि पूतिगन्धो भवेत्तदुत्सृज्य पुनरेवोत्पाद्य प्रचरेत्। तथा सवनीयानां पुरोडाशानाम्। तथा सान्नाय्यानाम्।

I.17.8 = 29.4 : 19-21 — अथ यदि स्तोत्रꣳ शस्त्रं प्रतिगरं वोत्सृजेन्मिन्दाहुती हुत्वोपाकुर्यात्। अथ यद्येकाꣳ स्तोत्रीयाꣳ सूक्तं वर्चं वार्धर्चं वा प्रतिगरं वोत्सृजेन्मिन्दाहुती हुत्वा जपेत्।

I. 17. 10 = 29. 4 : 21-24 — स्तोत्रोपाकरणप्रभृत्या होमाद्वाचं यच्छेद्। यदि वाचं विसृजेद् वैष्णवीमृचं जपेत्। अथ यद्याश्राव्य वाचं विसृजेद् वैष्णवीमृचं जपेत् 'विष्णो त्वं नो अन्तमः' इति। पुनरेवाश्राव्य यजेत्।

I. 17. 11 = 29. 4 : 24-27 — ऊनातिरिक्तपुनरुक्तव्याघातेष्वन्येषु वाऽन्यत्र प्रायश्चित्तं मिन्दाहुती जुहुयात्। सर्वस्थानेषु मिन्दाहुती यज्ञशरीरमिति श्रुतिः। तस्मात्सर्वेषामाचार्याणां प्रशस्तमिति।

I. 18. 6-7= *BaudhPS* I.5.11 — अथ यदि नष्टाग्निरपहताग्निर्विधुराग्निर्विच्छिनाग्निरुत्सृष्टाग्निः समारूढाग्निर्वा यजमानः प्रेयाद्यद्यस्य पुत्रो वाऽन्तेवासी वाऽलंकर्मिणः स्यात् प्राचीनावीतं कृत्वोद्धत्यावोक्ष्य यजमानायतने प्रेतं निधाय गार्हपत्यस्यायतनेऽक्ष्णी निधाय प्रेतस्य दक्षिणं बाहुमन्वारभ्य मन्थति 'येऽस्याग्न्योऽजुह्वतो मांसकामाः संकल्पयन्ते यजमानमाᳲसम्। जानन्तु ते हविषे सादिताय स्वर्गं लोकमिमं प्रेतं नयन्तु' इति। तूष्णीं विहारं कल्पयित्वा गार्हपत्य आज्यं विलाप्योत्पूय द्वादशगृहीतेन स्रुचं पूरयित्वा पुरुषसूक्तेन मनसाऽनुद्रुत्याहवनीये जुहोति, एतेनैव गार्हपत्ये जुहोति। तूष्णीमन्वाहार्यपचने हुत्वाऽत ऊर्ध्वं पैतृमेधिकं कर्म प्रतिपद्यते।

I.18.8 = *BaudhPS* II.5.2. अथ यद्यात्मनि समारूढेष्वग्निष्वरण्योर्वा यजमानो म्रियते यद्यस्य पुत्रो वाऽन्तेवासी वाऽलंकर्मिणः स्यात् प्राचीनावीतं कृत्वोद्धत्यावोक्ष्य यजमानायतने प्रेतं निधाय गार्हपत्यायतने लौकिकमग्निमुपसमाधाय प्रेतस्य दक्षिणं बाहुमन्वारभ्य जपति 'उपावरोह जातवेद इमं तᳲ स्वर्गाय लोकाय नय प्रजानन्। आयुः प्रजाᳲ रयिमस्मासु धेहि प्रेताहुतीश्चास्य जुषस्व सर्वाः' इति।

I.18.9. = *BaudhŚS* 13.43 — अथ यस्याग्नयो वृथाऽग्निभिः सᳲसृज्येरन् मिथो वाऽन्यस्य वाऽग्निभिः सोऽरण्योरग्नीन् समारोह्योदवसाय मथित्वाऽग्नीन् विहृत्याग्नये विविचये पुरोडाशमष्टाकपालं निर्वपत्यग्नये व्रतपतय इति।

I.19. 1 = 27. 5 : 1–2 — अथारणिगतानामजस्राणामन्वाहितानाᳲ सवनगतानां चाग्नीनामुद्वातानां प्रायश्चित्तिः।

I. 19. 2 = 27. 5 : 2 –6 — अरणिगतं मथित्वा विहारं कल्पयित्वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाऽऽहवनीये संतनीं जुहोति 'मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञᳲ समिमं दधातु। या इष्टा उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन स्वाहा' इति।

I. 19. 3 = 27. 5 : 6- 9 — एतत्प्रायश्चित्तमनुगतेऽहुतेऽभ्युदितेऽभिनिम्रुक्ते च। एतत्परिविन्नस्य। एतत्परिविविदानस्य। एतत्सोमवामिने सोमातिपविताय भक्षान्तरितस्य। एतद् भक्षरहितस्य। एतत्परीष्टस्य। एतत्परियष्टुः।

I. 19. 4 = 27. 5 : 9 –13 — एतदेव यस्य पुरुषो रथोऽश्वो गौर्महिषो वराहोऽहिर्मृगः श्वा वान्यद्वा श्वापदमन्तराग्नीन् गच्छेत्। एतदेव यस्याग्नेरेकदेशमपहरेयुः। एतदेव सर्वास्वेवाग्निहोत्रस्यार्तिषु मनस्वत्या प्रायश्चित्तिः क्रियते। इष्ट्वा वसीयान् भवतीति ब्राह्मणम्।

I.20.1 = 27. 8 : 1 — अथारण्योर्व्यापत्तिं व्याख्यास्यामः।



I.20.2 = 27.8:1-4—अष्टाभिर्निमित्तैर्विनश्यत्यमेध्यश्वचाण्डालशूद्रवायसपतितरासभरजस्वलाभिश्च सᳲस्पर्शनेऽरण्योर्विनाशः। तयोरुत्सृज्य समाने नवे अन्ये अरणी आहृत्याग्निसहमग्न्याधेयमरिणगतं पुनराधेयम्।

I.20.3 = 27.8 : 4-7 — नष्टारणी अप्सु निमज्जति 'भवतं नः समनसौ' इति। अथोत्तरां छित्वा भित्वा शकलीकृत्य मन्थनसामर्थ्यᳲ सारोंपणसामर्थ्यं मन्थनशेषं वा प्रमन्थनं च कुर्यात् समस्तशल्यवर्जम्।

I.20.4 = 28.8 : 7 — संतिष्ठतेऽरण्योर्व्यापत्तिः।

II.1.1 = 28.6 : 5-7 — यस्माद् भीषाऽवेपिष्ठाः पलायिष्ठाः समज्ञास्थाः शकृदकृथा मूत्रमकृथा इत्येतेषु निमित्तेषु 'य इदमकस्तस्मै नमस्तस्मै स्वाहा' इति तृतीयाम्।

II.1.2 = cf 28.6 : 11.19 — स उ चेत्प्राक् पर्यग्निकरणान्म्रियेत याऽश्वमेधे प्रायश्चित्तिस्तां कृत्वाऽथान्यं तद्दैवत्यं तद्वर्णं तद्वयसं तद्रूपं तज्जातीयं पशुमालभेत। तस्योपाकरणादि सर्वमावर्तते निर्मन्थ्य सामिधेनीतच्छेषाघारसंप्रैषसंमार्गप्रवरप्रयाजवर्जम्। अथ यदि तज्जातीयं न विन्देताजावयो गोअश्वा इत्यन्योऽन्यस्य प्रतिनिधयो भवन्तीति। ........अथास्य शरीरमप्सु प्रवेशयति 'न वा उवेतन्म्रियसे', 'आशानां त्वा विश्वा आशा' इति द्वाभ्याम्।

II.1.3 = cf. 28.6 : 7-11 — स यदि निषीदेत् 'यस्माद् भीषा न्यषदः' इत्येताᳲ हुत्वा तं मैत्रावरुणदण्डेनोत्थापयेदन्येनौदुम्बरेण वा।

II.1.4 = cf. 28.6 : 5-7

II.2.1 = cf. 28.6 : 5-7

II.2.2 = cf. 28.6 : 5-7

II.2.3 = cf. 28.6 : 1-4 — स यदि पशुरुपाकृतो वाश्येत 'यदस्य पारे रजसः' इत्येताᳲ हुत्वा नैमित्तिकीं द्वितीयां जुहोति 'यस्माद् भीषाऽवाशिष्ठास्ततो नो अभयं कृधि। प्रजाभ्यः सर्वाभ्यो मृड नमो रुद्राय मीढुषे स्वाहा' इति।

II.2.4 = cf.28.7 : 1-3 — अथ यद्यङ्गहीनः पशू रूपतो वर्णतो वाऽऽग्नेयीमाग्नावैष्णीमैन्द्रीं वायव्यां प्राजापत्यामिति च हुत्वा तमेवोपाकुर्यात्।

II.2.5 = 28.7 : 9-13 — अथ यदि वपा हविरवदानं वा स्कन्देत् 'आ त्वा ददे यशसे वीर्याय चास्मास्वघ्निया यूयं दधाथेन्द्रियं पयः' इत्यादाय जुहोति 'यस्ते द्रप्सो यस्त उदर्षो दैव्यः केतुर्विश्वं भुवनमाविवेश। स नः पाह्यरिष्ट्यै स्वाहा' इति।

II.2.6 = cf. 28.7 : 3-8 — अथ यदि वपामाह्रियमाणाꣳ श्येनोऽपहरेन्नश्येद्वा पात्र्याꣳ हिरण्यमन्तर्धाय चतुगृहीतं गृहीत्वाऽऽहवनीये जुहोत्यन्वारब्धे यजमाने 'उद्यन्त्सुपर्णो न विभाति सर्वꣳ हिरण्यकुक्षिः सप्तशिराः पुरस्तात्। सर्वेषु लोकेषु विभुः प्रविष्टो गातुमस्मिन् यज्ञे यजमानाय विन्द स्वाहा' इति। अथैतस्यै वपायै स्थाने यत्किञ्चिन्मेदोरूपमवशिष्टꣳ स्यात् तदुत्पाद्य तेन प्रचरेत्।

III.1.1. = cf. 9.17 : 6-8 — अथ यदि प्रवृत्तः प्रपतेद् गार्हपत्ये तिस्रः स्रुवाहुतीर्जुहुयात् 'भूर्भुवः सुवः' इति। अथैनमुच्छ्रयति 'ऊर्ध्व ऊ षु ण ऊतये', 'ऊर्ध्वो न पाह्यꣳहसः' इति द्वाभ्याम्। अथैनमाज्येन पूरयति 'अञ्जन्ति यं प्रथयन्तो न विप्राः' इति।

III.1.2 = cf. 9.17 : 9-11 — अथ यदि विधुर्वा प्रदरो वा जायतेऽश्मचूर्णानि छागापयसि संप्रकीर्य तैः प्रत्युक्ष्योल्मुकेनाभितपति 'विधुं दद्राणं', 'यदृते चिदभिश्रिषः' इति द्वाभ्याꣳ सꣳ हैव रोहति।

III.1.3 = cf. 9.17 : 11-14 — यद्यु वै सर्वश एव भिद्यत एतान्येव कपालान्यवाञ्जनं पिष्ट्वा यैषा मृत् प्रायश्चित्ताय परिशेते तया सꣳसृज्य कृत्वा पक्त्वाऽऽच्छृद्य निदधाति। अथान्यं प्रचरणीयं महावीरं प्रवृणक्ति। अथ यदि प्रमत्ता अतिपरियन्ति गार्हपत्ये तिस्रः स्रुवाहुतीर्जुहुयात् 'भूर्भुवः सुवः' इति। अथ 'पुनरूर्जा सह रय्या' इति पुनः प्रतिपरियन्ति। अथ यद्युद्यत्तः प्रपदेद् गार्हपत्ये तिस्रः स्रुवाहुतीर्जुहुयात् 'भूर्भुवः सुवः' इति। अथैनमभिमृशति 'मा नो घर्म व्यथितो विव्यथो नो', 'मा नः क्रतुभिर्हीडितेभिरस्मान्' इति द्वाभ्याम्।

III.1.4 = 29.11 : 8-11 — अथ यदि सान्नाय्ये घर्मे वा प्रवृत्तायां पयो न स्याद्येन केनचिदुपायेन किंचित् पयो दोहयित्वाऽद्भिः सꣳसृज्य प्रचरेत्। नैवान्यत्पय आनीय कुर्यात्। सैव ततः प्रायश्चित्तिः।

III.1.5 = 14.7 : 11 — अथ यदि प्रवर्ग्यं प्रवृत्तमादित्योऽभ्यस्तमियाद् गार्हपत्ये तिस्रः स्रुवाहुतीर्जुहुयाद् 'भूर्भुवः सुवः' इति। अथापरस्यां द्वारि सूत्रेण हिरण्यं प्रग्रथ्य प्रचरेत्।

III.2.1 = 14.7 : 1 — अथातो दीर्णप्रवृत्तानामेव मीमाꣳसा।

